Shiksharashmi

ISSN-2395-7921

# शिक्षारश्मिः

## शिक्षाशास्त्रविभागीयवार्षिकशोधपत्रिका

**2016**



शिक्षाशास्त्रविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
NAAC द्वारा A श्रेण्यां प्रमाणितः
(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)
क.जे.सोमैया-संस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई


प्रो.एम्. चन्द्रशेखरः, प्राचार्यः


प्रो.मदनमोहनझाः, विभागाध्य


डा.देवदत्तसरोदे


डा.वी.एस्.वी.भास्कररेड्डि


डा.आर्.जी.मुरलीकृ


डा.सी.ल.सीतारामशर्मा


डा. कुमारः


डा. सुनीलकुमारश

# शिक्षारश्मिः

## शिक्षाशास्त्रविभागीयवार्षिकशोधपत्त्रिका

**Departmental Annual Research Journal of Shiksha Shastra (Pedagogy)**

**2015-16**

हस्तन्यस्तसमस्तशास्त्रविभव ! प्रादान्न किन्ते फलं,
सर्पिर्दीपकवर्त्तिकाश्च विविधा नोद्दीपिताः किन्ततः ।
शास्त्रग्रन्थिगुरुत्वगर्वदमनः श्लाघ्यश्च सेव्यः सतां -
शिक्षारश्मिरतः सरेदपसरेच्चान्तस्तलीयन्तमः ॥


**संरक्षकः**

**प्रो. एम्. चन्द्रशेखरः**

**प्रधानसम्पादकः**

**प्रो. मदनमोहनझाः**

**सम्पादकः**

**डा. देवदत्तसरोदे**

**सहसम्पादकाः**

**डा. सो. ल. सीतारामशर्मा** **डा. कुमारः** **डा. सुनीलकुमारशर्मा**



**शिक्षाशास्त्रविभागः**

**राष्ट्रियसंस्कृतसंस्थानम्**

**मानितविश्वविद्यालयः**

**(मानवसंसाधनविकासमन्त्रालयभारतसर्वकाराधीनम्)**

**क. जे. सोमैयासंस्कृतविद्यापीठम्,**

**विद्याविहारः, मुम्बई**

**महाराष्ट्रम् -४०० ०७७**

पत्रिकानाम — शिक्षारश्मिः (शिक्षाशास्त्रविभागीयवार्षिकपत्रिका)
प्रकाशकः — शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि.)
क. जे. सोमैयासंस्कृतविद्यापीठम्,
विद्याविहारः मुम्बई, महाराष्ट्रम् - ४०००७७ ।

© प्रकाशकाधीनम्

ISSN — 2395-7921

संरक्षकः — प्रो. एम्. चन्द्रशेखरः
प्राचार्यः
प्रधानसम्पादकः — प्रो. मदनमोहनझाः
विभागाध्यक्षः, शिक्षाशास्त्रम्

सम्पादकः — डा. देवदत्तसरोदे
सहसम्पादकाः — डा. सोमाशिलक्ष्मीसीतारामशर्मा
डा. कुमारः
डा. सुनीलकुमारशर्मा

सम्पादकमण्डलम् — १. डा. वी. एस्. वी. भास्कररेड्डि
२. डा. आर्. जी. मुरलीकृष्णः
३. श्रीज्योतिरञ्जननन्द
४. श्रीसाईप्रसाद आप्टे
५. सुश्रीअनुसूया महान्ता
६. सुश्रीप्रियाङ्कामहापात्र

मुद्रणसहयोगः — लक्ष्मीकान्तदासः, देबाशिषपण्डा च

प्रकाशनवर्षम् — 2015-16 (तृतीयाङ्कः)
प्रतिकृतयः — 200
मुद्रकः — वन्दना आर्टस्, मुम्बई-77

**Shree Somnath Sanskrit University**
(Estd. By Government of Gujarat)
Rajendra Bhuvan Road, VERAVAL - 362266
District : Gir Somnath, Gujarat, INDIA
Phone : 02876 - 244531 Fax : 02876 - 244417

**Prof. Ark Nath Chaudhary**
Vice Chancellor


Ref : **SSSU/VC/234/2016**

Date : **02-03-2016**



## ॥ शुभाशंसनम् ॥

सम्पूर्णे भारते एकादशभिः परिसरैः समन्वितस्य संस्कृतविद्यासंवर्धनतत्परस्य राष्ट्रिसंस्कृतसंस्थानस्य मुम्बईनगरे क. जे. सोमैयापरिसरः विद्याविहारोपनगरस्थः विद्यावतां विहाराय महत्त्वपूर्णः, यत्र अर्वाच्यविद्याविद्भिः साकं प्राच्यविद्याप्रसारकर्मणि निरन्तरं संलग्नोऽयं परिसरः शास्त्राध्यापनेन सह अध्यापकशिक्षायै प्रशिक्षणपाठ्यक्रमं शिक्षाशास्त्रीति नामधेयं कुशलतया सञ्चालयति ।

शिक्षाशास्त्रविभागे कुशलानां विषयदक्षाणां आचार्योपाचार्यसहायकाचार्याणां नेतृत्वे अध्यापनकौशलेन सहैव लेखनकौशलमपि छात्राणां संवर्ध्यमानं वर्षेभ्योऽवलोकितं मया ।

अस्मिन्नेव क्रमे प्रो. मदनमोहनझामहोदयस्य आध्यक्ष्ये डा.देवदत्तसरोदेमहोदयस्य सम्पादकत्वे शिक्षाशास्त्रसम्बद्धाः महत्त्वपूर्णाः लेखाः विशिष्टानां विदुषामपि सङ्कलीक्रियन्ते प्रतिवर्षम् ।

एतान् महत्त्वपूर्णान् शिक्षाशास्त्रसम्बद्धान् उपयोगिनः लेखान् प्रकाशयितुं शिक्षाशास्त्रविभागः **शिक्षारश्मिः** इत्यभिधेयां वार्षिकीं शोधपत्रिकां प्रकाशयति इति वेदं वेदं भृशं प्रसीदामि । सर्वेभ्यो मान्यलेखकेभ्यो विभागाध्यक्षसहितसम्पादकप्राध्यापकेभ्यः मदीयां हार्दीं शुभकामनां प्रकटयामि ।

भावत्कः शुभाकाङ्क्षी

(प्रो. अर्कनाथचौधरी)
कुलपतिः

**प्रो. आर्. देवनाथन्,**
(पूर्वकुलपतिः श्री.ज.रा.रा.सं.विश्वविद्यालयः)
प्राचार्यः, राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
श्रीरणवीरपरिसरः, जम्मू

**Prof. R. Devanathan**
Ex. Vice Chancellor of S.J.R.R.S.University
Principal
Rashtriya Sanskrit Sansthan
(Deemed University)
Shri Ranveer Campus, Jammu

दूरभाष क्र. (का) - 0191-2450287

Mail (O) ranbirjmu@gmail.com



## शुभाशंसा

॥ विद्या विवेकाय ॥

शिक्षारश्मिर्भूयादहृद्या मुम्बैपीठं वृद्धिं यायात् ।
सर्वा शिक्षा सार्था पुष्टा सम्पद्दात्री मान्या नूनम् ॥१॥

परब्रह्मबुद्धिः परं लक्ष्यमासीत् शमः शिक्षयाप्तो महत्कार्यमासीत् ।
मनोयन्त्रणं वै सुखं शास्त्रबोध्यं श्रुते रक्षणं नः प्रधानं क्रिया स्यात् ॥२॥

चरित्रं विशुद्धं शरीरं च चित्तं ह्यलंबुद्धिरन्या सदा प्रेमधीः स्यात् ।
समं सर्वजीवो न चास्तीह भेदो स्वधर्मे च निष्ठा विधर्मे न हेला ॥३॥

प्रिया नानृता वाक् सधर्मार्थकामौ सदाचारता स्यात् तुरीये मतिः स्यात् ।
न चार्थप्रधाना सुधर्मा च पन्थाः सवेदं सशास्त्रं सुरक्षा हि नीतिः ॥४॥

नवा शास्त्रशिक्षा मनोवित्प्रधाना पुनःशिक्षकाणां प्रशिक्षा विनूत्ना ।
विदेशीयशिक्षाप्रणाली च मूला समं भारतं या समाश्रीयते सा ॥५॥

सुरश्मिश्च भूयात् सुशिक्षा प्रवर्त्या सुसोमय्यपीठात् समेषां प्रयासैः ।
भृशं नन्दतात्सा सुविद्याधिदेवी शुभं छात्रसम्पत्सदा वर्धतां वः ॥६॥

शिक्षा नूत्ना रश्मिः प्रत्नो हर्षं दद्याद् बुद्धिं कुर्यात् ।
विद्या छात्रान् प्राप्नोच्छीघ्रं सर्वो नन्द्यादिष्टं भूयात् ॥७॥

**मन्मथ-कुम्भ-कृष्ण-चतुर्थी**
(26-02-2016)

इत्थं विदां वचनकरः,
**रामानुजदेवनाथः**

**RI JAGANNATH SANSKRIT VISHVAVIDYALAYA**

**SHRI VIHAR, PURI - 752003, ODISHA**

Ph. (06752) 251663(Off.)
251640(Res.)
250484(Fax.)
visit : www.sjsv.nic.in
Email:sanskrit.university@yahoo.com

*of.Gangadhar Panda*
VICE - CHANCELLOR



## शिवसंकल्पः

धर्मार्थकाममोक्षरूपचतुर्विधपुरुषार्थप्राप्तिमलभमानाः तत्साधनोपायज्ञानहीना विपर्यस्ताज्ञसन्दिग्धाः पुरुषाः लोकव्यवहारेऽपि मोहान्धकारेणाप्रकाशितमार्गाः भोजनप्राप्त्यार्थं पाकशरणा बुभुक्षव इव शिक्षैकशरणा पुरुषार्थसाधनविद्याग्रहण इति नाविदितं किंचिद्विदुषाम् ।

तस्यैतस्याः सकलपुरुषार्थसाधनोपायप्रकाशनैकदीक्षायाः स्वयमप्यतिरुचिरायाः अज्ञजनतिमिरापहारिण्याः; विपर्यस्तजनविपरीतख्यातिमूलोत्पाटनपटीयस्याः सन्दिग्धजनसन्देहदूरीकरणचतुरायाः शिक्षायाः रश्मिं विकिरतीयं **शिक्षारश्मिः** निखिलं विद्यातत्त्वजातं सूर्यरश्मिरिव प्रकाशयर्ता विदुषामाह्लादं चन्द्ररश्मिरिव जनयती स्वरूपप्रकाशं प्रास्यतीति श्रुत्वा मोमुद्यते मेऽन्तःकरणम् ।

आशासे शिक्षारश्मिनामिकायाः पत्रिकायाः सौष्ठवमस्य च विभागस्य विवृद्धिम् । नीलकन्दरनिवासी श्रीजगन्नाथः सर्वेषां मङ्गलं वितनोत्विति ।

18/2/16
(प्रो. गङ्गाधरपण्डा)

कुलपतिः

**प्रो. एम्. चन्द्रशेखरः, प्राचार्यः**
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
क. जे. सोमैयासंस्कृतविद्यापीठम्,
विद्याविहारः, मुम्बई-४०००७७

**Prof. M. Chandrashekhar**
**Principal**
Rashtriya Sanskrit Sansthan
(Deemed University)
K.J.Somaiya Sanskrit Vidyapeetham
Vidyavihar, Mumbai -400077

मोबाईल क्र. 9769584349, दूरभाष क्र. (का) - 022-21025452/82, ई-मेल - rsksmumbai@yahoo.com



## ॥ शुभाशंसनम् ॥

**शिक्षा विकासे मनुजस्य पूर्णः प्रकाश एवानुभवो विशिष्टः ।**
**सामाजिकं या विदधाति रूपं नरस्य यज्जीवनमेव शिक्षा ॥**

ननु शिक्षा हि जीवनम् । शिक्षामन्तरा जीवनसद्भाव एव ऊहितुमप्यशक्यः । इयं हि शिक्षा मानवं पशुभ्यः पृथक्कृत्य तं लोकोत्तरं विधातुं समर्था । यथा यथा शिक्षायाः महत्त्वं जनैः ज्ञातं, तथा तथा शिक्षाशास्त्रस्यापि अध्ययनम् अध्यापनञ्च सर्वेषु देशेषु व्यापृतम् । शिक्षया सम्बद्धानि अनेकानि शास्त्राणि अस्याङ्गत्वमवाप्नुवन्, यथा - दर्शनं, मनोविज्ञानं, सम्प्रेषणप्रविधिः, समाजविज्ञानं, शिक्षणविधयः, अनुसन्धानमित्यादीनि । वैज्ञानिकचिन्तनस्य आधारेण शिक्षाक्षेत्रे नवीनानामुपकरणानां, नियमानां, साधनानाञ्च आविष्कारेण साधिता प्रगतिः प्रशंसनीया एव ।

छात्रकेन्द्रितशिक्षायाः सर्वोत्तमप्रचारेण शिक्षकाणामुत्तरदायित्वं प्रतिदिनं प्रवर्धमानमस्ति । अतः संस्कृतशिक्षकाः नूनमेव विषयाणां बोधनाय शिक्षणविज्ञानेन परिचिताः भवेयुः । अत एव शिक्षकप्रशिक्षणसंस्थानामुत्तरदायित्वं महत्तमं वरीवर्ति । तत्र राष्ट्रियसंस्कृतसंस्थानस्य नैकेषु परिसरेषु शिक्षाशास्त्रविभागः संस्कृतशिक्षकप्रशिक्षणकार्ये संलग्नोऽस्ति ।

तेष्वन्यतमः मुम्बईपरिसरः मुम्बापुर्यां राराज्यते । तत्राध्ययनाध्यापनसुखसौविध्यभरितेनातिप्रवृद्धेन शिक्षाविभागेन शिक्षकाणां हृदयसङ्गमनी शिक्षारश्मिः इति नाम्नी वार्षिकशोधपत्रिका तृतीयाङ्कभूता प्राकाश्यं नीयत इति नो मोदाय ।

विभागाध्यक्षेण सह सर्वेऽपि सदस्याः, तेषामन्तेवासिनश्च भृशमभिनन्दनार्हाः । शोधपत्रिकाया अस्याः सफलप्रकाशनाय कारणीभूतेभ्यः सर्वेभ्यः साधुवादाः ।

शिक्षारश्मयः दोधूयन्ताम् इत्याशासे ।

॥ शुभं भूयात् ॥

(प्रो. एम्. चन्द्रशेखरः)
प्राचार्यः

**प्रो. मदनमोहनझाः**
**शिक्षाशास्त्रविभागाध्यक्षः**
रष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
क. जे. सोमैया संस्कृतविद्यापीठम्,
विद्याविहारः, मुम्बई-४००७७
मोबाईल क्र. 9004904059,

**Prof. Madanamohan Jha**
HoD, Department of Education
Rashtriya Sanskrit Sansthan
(Deemed University)
K.J.Somaiya Sanskrit Vidyapeetham
Vidyavihar, Mumbai -400077
ई-मेल - mmjha44@gmail.com

# समर्पणम्

भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा तत्रापि संस्कृतिः संस्कृताश्रिता, भारतस्य जीवातुभूतं संस्कृतं संस्कृतशास्त्रपरम्परां पातुं प्रसारयितुं चिराय कार्यं कुर्वद् विलसति राष्ट्रियसंस्कृतसंस्थानम् । संस्थानस्यास्य एकादशसु परिसरेषु अन्यतमोऽयं परिसरः राष्ट्रियसंस्कृतसंस्थानम्, क.जे,सोमैया संस्कृतविद्यापीठम्, मुम्बई । अत्र व्याकरणम्, साहित्यम्, ज्योतिषम्, शिक्षाशास्त्रम् इति चत्वारः विभागाः सन्ति ।

**स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्** इति आगमवचनमनुसरता शिक्षाशास्त्रविभागेन प्रतिवर्षमिव ऐषमः शिक्षारश्मिः इति वार्षिकी शोधपत्रिका प्रकाश्यत इति महतः प्रमोदस्य विषयः । शिक्षाशास्त्रविद्वद्भिः, शोधच्छात्रैश्च महता प्रयत्नेन रचितानि शिक्षाशास्त्रतत्त्वैः भूषितानीमानि शोधपत्राणीह ग्रथितानि सन्ति । एतद् दर्शं दर्शं नूनं स्वान्तं मे समधिकं कान्तं समजनि । शिक्षाशास्त्रगवेषकाणां शिक्षाशास्त्रिशिक्षाचार्यच्छात्राणां महते उपकाराय कल्पते इत्यत्र नास्ति द्वैतम् । संस्कृतसारस्वतयागे प्रदीयमानमिदमनवद्यं हव्यं ज्ञानरश्मीन् दिग्दिगन्तराले विकीर्य सर्वत्र ज्ञानं विज्ञानं वितनिष्यतीति भावयामि । यद्यपि प्रयत्नेन साधितं कार्यमिदं पुनरपि क्वचिद् न्यौन्यञ्चेत् तत्सुहृद्भावेन दोषप्रहाणाय सूचयितुमर्हन्ति विज्ञाः पाठकाः विपश्चिद्वराः ।

परिसरस्यास्य प्राचार्याणां सततप्रेरणया, प्रोत्साहनेन, निर्देशनेन, विभागीयप्राध्यापकानामविरामयत्नेन, छात्राणां महता साहाय्येन कार्यमिदं सौकर्येण समपद्यत, अत्र विभागीयाध्यापकः अस्मदनुजकल्पः आयुष्मतः डा. सीतारामस्य अवदानं भूयो भूयः स्मरामि, यस्य प्रयत्नेन कार्यमिदं सम्पन्नतामयात्, तम् आशिषा वर्धापयामि ।

परिसरोऽयं विभागोऽयं अग्रे अग्रे एवमेव वर्धताम् इति कामनया विरमामि विस्तरात् ।

मन्मथफाल्गुनशुक्लाष्टमी,
विक्रमसंवत्, २०७२

**प्रो. मदनमोहनझाः**
**प्रधानसम्पादकः**

# सम्पादकीयम्

**इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।**

**शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि ।।** ऋ.७.३२.२६

उल्लिखिते वेदमन्त्रे शिक्षाशास्त्रस्य बीजं निहितम्। अस्यार्थः - हे इन्द्र ! उत्तमविचारान् अनवद्यं कार्यं वा अस्मासु निधेहि, यथा पुत्रेभ्यः पिता प्रयच्छति तथा अस्मान् बोधय (अस्मभ्यं विद्याप्रदानं कुरु), हे परमवन्दनीय! अस्मिन् अज्ञानतमोबहुले संसारे (कण्टकाकीर्णे पथि) जीवाः वयं ज्ञानालोकं सेवेमहि ।

तापत्रयविघाताय प्रच्छन्नाज्ञानध्वान्तमपाकर्तुमलममलं ज्ञानमितीह नहि लेशतोऽपि संदेहः । तथा च **ऋते ज्ञानान्न मुक्तिः** अपि च **नहि ज्ञानेन सदृशं पवित्रमिह विद्यते** इति वचनाभ्यां सुतरामेतत्प्रमाणीभवति । तदेतज्ज्ञानं कथङ्कारं सम्पादनीयमिति जिज्ञासायाम् उच्यते **तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया** इति अभिरूपतरमुपायं प्रोवाच भगवान् श्रीकृष्णः । किञ्च तैत्तिरीयोपनिषदि.... अथाधिविद्यमिति संहितायां **आचार्यः पूर्वरूपम् अन्तेवास्युत्तररूपं विद्या सन्धिः प्रवचनं सन्धानम् इत्यधिविद्यमिति** शिक्षाप्रक्रिया निर्दिष्टा, अपि च **चतुर्भिः प्रकारैर्विद्योपयुक्ता भवति । आगमकालेन स्वाध्यायकालेन प्रवचनकालेन व्यवहारकालेन** इति भाष्यकारः विद्याधिगमोपायान् उपदिदेश । उभयत्र निर्दिष्टं प्रवचनमिति पदम् गुरोः ज्ञानप्रदानं शिक्षणं वा सूचयति, पूर्वैः आचार्यैः सञ्चितं संगृहीतं विमलं ज्ञानम् द्विधा प्रदीयते मौखिकं लिखितञ्च । अज्ञानतिमिरान्धत्वं निवारयितुं संस्कृतसंस्कृतिवेदादिशास्त्रज्ञानविज्ञानपरम्परां रक्षितुम् ऋषिभिः आचार्यैः अजस्रमुभयविधं सारस्वतसत्रम् अनुष्ठितं तदेतद् अग्रे अनुवर्ततामिति धिया एकादशपरिसरमद् राष्ट्रियसंस्कृतसंस्थानमनिशं प्रयतमानं परिलक्ष्यते । संस्थानस्य अन्यतमं राष्ट्रियसंस्कृतसंस्थानम् क.जे. सौमैयासंस्कृतविद्यापीठम् मुम्बईस्थम् । तत्रत्यशिक्षाशास्त्रविभागेन सारस्वतयागे स्वीयं भव्यं हव्यं प्रदित्सया आलोकम् आलोकः प्रसरतात् इति मनीषया शिक्षाशास्त्रशेमुषीजुषां शिक्षातत्त्वैरुपबृंहिता यूनां विचारसारैः उपनिबद्धा शिक्षारश्मिनाम्नी वार्षिकी शोधपत्रिका प्रकाश्य समर्प्यत इति नितरां मोमुदति नश्चेतांसि ।

संस्कृताङ्ग्लहिन्दीतित्रिभाषाभिः संवलितेयं शोधपत्रिका, शिक्षाशास्त्रविपश्चितामाचार्याणां, यूनां धीमताम् अध्यापकानाम्, अनुसन्धित्सूनाम् अभिनवगवेषकाणां शोधपत्राणि शिक्षाशास्त्रिच्छात्राणां परियोजनासारतत्त्वानि च संग्रथितान्यत्र, पत्रिकागुणवत्ताधरोत्तरत्वविवेकाय कोविदा एव प्रमाणम्... यतो हि आ परितोषाद्विदुषां न साधु मन्ये ।

मुम्बईपरिसरस्य शिक्षाशास्त्रविभागोऽयमनुदिवसमुदयाचलमारूढो बालार्क इव सर्वविधशिक्षाशास्त्र-कौशलैः परिवर्धमानःपर्यालोक्यतेऽत्र हेतुत्रयं वेविद्यते । तत्र तावत् परिसरस्य प्राचार्याणां प्रो. एम् . चन्द्रशेखरवर्याणां संरक्षणे निर्देशनेऽयाचितसहायेन, विभागाध्यक्षाणाम् आचार्याणां प्रो. मदनमोहनझावर्याणां मार्गदर्शनेन, विभागीयप्राध्यापकानाम् अध्यापनैकनिष्ठानां मामकानां मित्रमणीनां छात्राणाञ्च सहयोगेन सर्वमेतद् अनायासेन सम्पद्यमानं विलसति ।

प्रकाशनकार्यमिदं जटिलं दुष्करं प्रतीयमानमप्यात्मीयानां डा.सीतारामः, डा.कुमारः, डा.सुनीलकुमारशर्मा इत्येतेषां सहसम्पादकानां कर्मठकरोपात्तं सरलं साधीयश्च समपद्यत, तत्रापि अस्मत्सुहृदः डा. सीतारामस्य महदवदानं सर्वथा बोभोतीति नात्राल्पीयान् आरेकः ।

शिक्षाशास्त्रिच्छात्राध्यपकानां लक्ष्मीकान्तदासस्य, टिकेराममिश्रस्य, देबाशीषस्य, पुष्पेन्द्रस्य, अहकितैस्य, ज्योतीरञ्जनस्य सहयोगः अनुपमः ।

कृतेऽपि यत्ने मनुजदौर्बल्यात् त्रुटयो जायन्त एव स्वाभाविकमेतत् ताः त्रुटयः वदान्यतया मर्षयितव्या इति निवेद्य किं बहुना विस्तरप्रकाण्डेनेति विरमामि विस्तरात् ।

भवदीयः

डा. देवदत्त सरोदे (सम्पादकः)

# शिक्षाशास्त्रविभागीयगतिविधयः

**2015-16**

राष्ट्रियसंस्कृतसंस्थानमिति भारतकेन्द्रसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीने काचिद्विशिष्टा सांस्कृतिकभाषासम्बद्धा संस्था १९८३ तमे वर्षे संस्थापिता । सेदानीमेकादशपरिसरैस्सुशोभिता वर्तते । तदधीने संस्कृतभाषायाः स्वाध्यायप्रवचनशिक्षणार्थं शिक्षाशास्त्रविभागः समुपास्थापि । संस्थानान्तर्गतेष्वेकादशपरिसरेषु क.जे.सोमैयासंस्कृतविद्यापीठमिदं महाराष्ट्रराज्यस्य मुम्बईनगरस्थे विद्याविहारे सुशोभते । परिसरेऽस्मिन् संस्कृत-शिक्षाशास्त्रविभागः, व्याकरण-साहित्य-ज्योतिषविभागाश्च सन्ति । २००६ तमे वर्षे महाराष्ट्रप्रदेशे संस्कृत-शिक्षकाणां प्रशिक्षणार्थं शिक्षाशास्त्रविभागोऽयं संस्थानेन समारभ्यत । परिसरस्यास्य प्रथमप्राचार्याः भवन्ति प्रो.प्रकाशचन्द्रमहोदयाः । तथा प्रथमशिक्षाशास्त्रविभागाध्यक्षाः भवन्ति प्रो.लोकमान्यमिश्रमहोदयाः । अधुना विभागोऽयं प्राचार्याणाम् आचार्याणाम् एम्.चन्द्रशेखरमहोदयानां मार्गदर्शने, आचार्याणां मदनमोहनझा-महोदयानाम् च आध्यक्ष्ये भारते एव सर्वोत्कृष्टशिक्षाविभागेषु अन्यतमत्वेन विराजते । परिसरेऽस्मिन् भारतस्य विभिन्नेभ्यः प्रान्तेभ्यः समागत्य छात्राः शिक्षाशास्त्रमधीयते ।

वर्षेऽस्मिन् एन्. सी. टी. ई. द्वारा प्राप्तसूचनानुसारं विभागेन शिक्षाशास्त्रिपाठ्यक्रमः द्विवर्षीयः सञ्चाल्यमानो वर्तते । तत्र विभागस्य मुख्यं लक्ष्यं तावदुत्तमोत्तमाध्यापकानां निर्माणम् । तदर्थं छात्राध्यापकेषु शिक्षणकौशलानि प्राशासनिकक्षमता, संस्कृतसम्भाषणदक्षता, प्रायोगिक - व्यावहारिक - प्राविधिक - मनोवैज्ञानिक - विज्ञानज्ञानानुप्रयोग - क्षमता इत्यादीनां सम्पादनं विभागस्य प्रमुखं कार्यं वर्तते । तल्लक्ष्यप्राप्त्यर्थं श्रेष्ठाध्यापकानां समवायोऽत्र सदा कार्यनिरतोऽस्ति ।

**वर्तमानशिक्षाशास्त्रविभागीयाध्यापकाः**

| क्रमसंख्या | अध्यापकस्य नाम | पदम् |
|---|---|---|
| 01 | प्रो. मदनमोहनझाः | आचार्यः विभागध्यक्षश्च |
| 02 | डा. देवदत्तसरोदे | सहायकाचार्यः (वरिष्ठः) |
| 03 | डा. वि.एस्.वि. भास्कररेड्डि | सहायकाचार्यः (वरिष्ठः) |
| 04 | डा. आर्.जी. मुरलीकृष्णः | सहायकाचार्यः (वरिष्ठः) |
| 05 | डा. एस्. एल्. सीतारामशर्मा | सहायकाचार्यः (संविदा) |
| 06 | डा. कुमारः | सहायकाचार्यः (संविदा) |
| 07 | डा. सुनीलकुमारशर्मा | सहायकाचार्यः (संविदा) |

## गतषड्वर्षेषु छात्राणां परीक्षापरिणामः

| क्रम.सं. | शैक्षिकसत्रम् | नामाङ्कित-छात्राः | उत्तीर्णछात्राणां प्रतिशतता | प्रथमश्रेण्याम्-उत्तीर्णाः | विशेषाङ्कप्राप्त-छात्राः |
|---|---|---|---|---|---|
| 01 | 2009-10 | 68 | 100 | 37 | ----- |
| 02 | 2010-11 | 73 | 100 | 71 | ----- |
| 03 | 2011-12 | 49 | 100 | 49 | 11 |
| 04 | 2012-13 | 57 | 100 | 57 | 43 |
| 05 | 2013-14 | 63 | 100 | 62 | |
| 06 | 2014-15 | 95 | 100 | 94 | |
| 07 | 2015-16 | 47 | अधीयानाः वर्तन्ते | | |

**छात्रोपलब्धयः —**

परिसरेऽस्मिन् ये छात्राः शिक्षाशास्त्रिकक्ष्यामुत्तीर्णवन्तः ते प्रायः सर्वेऽपि न केवलं शिक्षाक्षेत्रेऽपि त्वन्यक्षेत्रेषूद्योगं प्राप्योत्तमोत्तमस्थाने विराजमानाः सन्तीति वक्तुं मोमुदीति नश्चेतः । तेषु विशेषतः केचन केन्द्रसर्वकारीयोद्योगेषु, राज्यसर्वकारीयोद्योगेषु, केचन केन्द्रीयविद्यालयेषु, डी. ए. वी. संस्थासु, विभिन्नराज्यस्तरीय -विद्यालयेषु, दिल्ली-स्वायत्त-विद्यालयेषु, सामान्यविद्यालयेषु च कार्यं कुर्वाणा विद्यन्ते । तथैव केचन छात्राः विश्वविद्यालयस्तरेऽपि उपाधिधारिणः वर्तन्ते इति कथयितुं नन्दामो वयम् ।

**2015-16 शिक्षाशास्त्रविभागीयगतिविधयः —**

शैक्षिकसत्रेऽस्मिन् 51 छात्राध्यापकाः प्रवेशं स्व्यकार्षुः । परन्तु तेषु कश्चिदुद्योगं प्राप्य निर्गतवान् । एवमेव द्वित्राः कक्ष्यामागन्तुमसमर्थाः अत्यजन् । अधुना 47 छात्राध्यापकाः अधीयानाः सन्ति । ते महाराष्ट्र – राजस्थान - गुजरात – मध्यप्रदेश – उत्तरप्रदेश - उत्तराखण्ड - हिमाचलप्रदेश - पश्चिमबङ्गाल – ओडिसा - दिल्ली – हरियाणा - बिहारप्रान्तेभ्यः समागताः । एतेषां सत्रारम्भः 14.07.2015 दिनाङ्के समभूत् । विभागेऽस्मिन् छात्राणां बौद्धिकविकासाय बहवः कार्यक्रमाः समायोजिषत । ते यथा —

1. सत्रोद्घाटनकार्यक्रमः — 14 – 07 - 2015
2. गुरुपूर्णिमामहोत्सवः — 31 - 07 - 2015
3. एकविंशतिदिनात्मकभाषाबोधनवर्गः — 06 – 08 – 2015 तः 26 – 08 – 2015 पर्यन्तम् ।

अ. दशदिनात्मकसम्भाषणशिबिरम् ।

इ. संस्कृतभाषाबोधनम् ।

उ. हिन्दीभाषाबोधनम् ।

ऋ. आङ्ग्लभाषाबोधनम् ।

| | |
|---|---|
| 4. प्राध्यापाकैः अभिविन्यासकार्यक्रमे भागग्रहणम् | 24-8-2015 तः 28-4-2015 |
| 5. शैक्षिकसर्वेक्षणम् संस्कृतप्रचारश्च | 23-08-2015 दिनाङ्कतः 27-08-2015 पर्यन्तम्। |
| 6. शिक्षाशाखाध्यापकाभिविन्यासकार्यक्रमः | 24-08-2015 दिनाङ्कतः 28-08-2015 यावत्। |
| 7. संस्कृतसप्ताहः | 27-08-2015 दिनाङ्कतः 29-08-2015 यावत्। |
| 8. वाग्वर्धिनीसभा | प्रतिशुक्रवासरं मध्याह्ने। |
| 9. शिक्षकदिवसः | 4 सितम्बर 2015 |
| 10. हिन्दी पखवाडा | 14 सितम्बर 2015 तः 28 सितम्बर 2015 पर्यन्तम्। |
| 11. क्रीडोत्सवः क्रीडास्पर्धाश्च | आगस्तमासे 2015 |
| 12. राष्ट्रिय-एकता दिवसः | 31 अक्टोबर 2015 |
| 13. युवमहोत्सवः | 30-10-2015 तः 02-11-2015 पर्यन्तम्। |
| 14. संविधानदिवससप्ताहः | 26-11-15 तः 30-11-2015 पर्यन्तम्। |
| 15. प्रायोजनाकार्यम् | दिसम्बरमासे 2015 |
| 16. स्वामिविवेकानन्दजयन्तीसमारोहः | 12-01-2016 |
| 17. विभागीयराष्ट्रियसङ्गोष्ठी | 18 जनवरी 2016 तः 19 जनवरी 2016 पर्यन्तम्। |
| 18. विशिष्टव्याख्यानमाला | 19 जनवरी 2016 |
| 19. सूक्ष्मशिक्षणप्रशिक्षणम् | जनवरीमास्य चतुर्थसप्ताहे 2015 |
| 20. वसन्तपञ्चमी - सरस्वतीपूजा च | 12-02-2016 |
| 21. नाट्यमहोत्सवः | 24 फरवरी 2016 तः 26 फरवरी 2016 पर्यन्तम्। |
| 22. समूहचर्चा | 22 फरवरी, सोमवासरे 2016 |
| 23. सङ्गणकप्रशिक्षणकार्यशाला | 01-03-2016 तः 02-03-2016 पर्यन्तम्। |
| 24. मातृभाषादिवसः | 03-03-2016 |
| 25. विद्यालयीयावबोधः(शालासमीक्षा) | 08-03-2016 तः 12-03-2016 पर्यन्तम् |
| 26. वार्षिकोत्सवः | 18-03-2016 |
| 27. वार्षिकपरीक्षारम्भः | 16-4-2016 तः भविष्यति |

1. **अध्ययनार्थं सौलभ्यानि —**

परिसरेऽस्मिन् छात्राणां कृते अध्ययनार्थं प्राविधिकमनोवैज्ञानिककक्षाप्रकोष्ठः विद्यते । प्रकोष्ठेऽस्मिन् सङ्गणकध्वनिमुद्रिकाप्रक्षेपकयन्त्रैः दैनन्दिनपाठनं प्रचलति । तथैव छात्राणां कौशलाभिवर्धनार्थम् इमानि सौलभ्यानि वर्तन्ते ।

१. **छात्रवृत्तिः**- शिक्षाशास्त्रिकक्ष्यायां पञ्चविंशतिः (50%) छात्राध्यापकाः स्वशैक्षिकयोग्यतानुगुणं प्रतिमासमष्टशतं (800/-) रूप्यकाणां छात्रवृत्तिं प्राप्नुवन्ति ।

२. **सङ्गणकप्रयोगशाला** — छात्राणां प्राविधिकसङ्गणकीयकौशलान्यभिवर्धयितुं सङ्गणकप्रयोगशाला स्थापिता । यत्र दशाधिकसङ्गणकानि कार्यं कर्तुमुपलभ्यन्ते ।

३. **मनोविज्ञानप्रयोगशाला** — पाठ्यक्रमानुगुणं मनोविज्ञानप्रयोगान् कर्तुं यथासंख्यं पर्याप्तोपकरणानि विद्यन्ते । तथा पाठ्यक्रमेतरोपकरणानि अपि उपलब्धानि वर्तन्ते । तेषु अवधान-व्यक्तित्व-बुद्धि-अभिरुचि-अभिवृत्ति-चिन्तनविषयकाध्ययनार्थं मनोवैज्ञानिकोपकरणानि सन्ति ।

४. **विभागीयग्रन्थालयः** — परिसरीयबृहद्ग्रन्थालयमतिरिच्य विभागीयग्रन्थालये छात्रेभ्यः पाठ्यक्रमविषयान् अध्येतुं पुस्तकानि यथेष्टं स्वीकर्तुम् अवसरः प्रदीयते । तथैव ग्रन्थालयेऽस्मिन् १३२० पुस्तकानि पाठ्यक्रमसम्बद्धानि पाठ्यक्रमेतराणि अनुसन्धानविषयनिष्ठानि संस्कृतभाषादक्षतोत्पादकानि उच्चतरशिक्षापिपठिषूणां पिपासोपशमार्थम् उपलभ्यन्ते ।

५. **ई-ग्रन्थालयः** — प्रायः त्रिसहस्राणाम् ई-ग्रन्थानां सक्रमोपलब्धिः सङ्गणकप्रयोगशालायां विद्यते । तत्र यथेष्टं छात्राः सर्वविधपुस्तकानि सङ्गणकद्वारा पठितुं शक्नुवन्ति ।

६. **प्रविधिप्रयोगशाला** — छात्राणां प्राविधिकज्ञानार्थम्, उपकरणनिर्माणार्थम्, सङ्गणकमाध्यमेन पाठनाभ्यासं कर्तुं पर्याप्तोपकरणानि प्रविधिप्रयोगशालायां विद्यन्ते ।

७. **क्रीडाविभागः** — छात्राणां सर्वाङ्गीणविकासार्थं विभिन्नप्रकारकाः क्रीडाः क्रीडयितुं श्री शङ्कर आन्धले इति क्रीडाप्रशिक्षकः वर्तते । यस्य मार्गदर्शने सोमैयापरिसरीयप्राङ्गणेषु शारीरक - बौद्धिकक्रीडाः क्रीडितुम् अवसराः कल्प्यन्ते ।

**विभागे शोधावसराः —**

छात्रैः विद्यावारिधिः (Ph.D.) इत्युपाधिं प्राप्तुं सुयोग्याः मार्गदर्शकाः विद्यन्ते । शोधविभागेऽस्मिन् शिक्षाशास्त्रसम्बद्धाः छात्राः तथा आधुनिकसंस्कृतविज्ञानशोधचिकीर्षवः तथा विभिन्नक्षेत्रेषु शोधं विधातुं पर्याप्तावसराः कल्पिताः । अधुना विभागेऽस्मिन् सप्तशोधच्छात्राः (७) स्वीयमनुसन्धानं सम्पादयन्तः विद्यन्ते ।

इत्थं सर्वविधसाधनैः साकं परिसरीयशिक्षाशास्त्रविभागोऽयं सर्वेषां छात्राध्यापकानां शोधोत्सुकानां च छात्राणां शिक्षणकौशलानि अभिवर्धयन् समेधते ।

*******

# विषयानुक्रमणिका


| क्र.सं. | शीर्षकम् | लेखकः | पुटसंख्या |
|---|---|---|---|
| 1. | RESEARCH DESIGN (A Thought Content) | - Prof. M. Chandrashekhar | 01-03 |
| 2. | अवधानविस्तारः, तस्य मापनविधिः | - प्रो.मदनमोहनझा | 04-13 |
| 3. | अध्यापकेषु भाषाकौशलोन्नयनोपायाः | - डा.देवदत्तसरोदे | 14-19 |
| 4. | भूमण्डलीकरणं शिक्षा च | - डा.वी.एस्.वी.भास्कररेड्डी | 20-25 |
| 5. | विराडसि विष्णुरिवेह सरस्वती | - डा.आर्. जी. मुरली कृष्णः | 26-28 |
| 6. | योगशास्त्रानुसारं स्मृतिविचारः | - डा.सो.ल.सीतारामशर्मा | 29-31 |
| 7. | Importance of English Teaching in Traditional Teacher Training Colleges | - डा.कुमारः | 32-35 |
| 8. | Mental health in India and Services | - Shri. Shankar Baburao Aandhale | 36-41 |
| 9. | शिक्षा तकनीकी और संस्कृत अध्यापक की भूमिका | - डा.सुनीलकुमारशर्मा | 42-46 |
| 10. | समायोजन एवं रक्षाप्रतितन्त्र | - डा.आरतीशर्मा | 47-51 |
| 11. | छात्राणां भाषाकौशलोन्नयनोपायाः | - डा.बिचित्ररञ्जनपण्डा | 52-56 |
| 12 | संकृते पठनकौशलम् | - डा. इ. वेङ्कटेश्वर्लु | 57-62 |
| 13. | सामाजिकविज्ञानशिक्षणस्य शिक्षणप्रतिमानानि | - डा. प्रेमसिंहसिकरवारः | 63-66 |
| 14. | संस्कृताधिगमे कतिचनाधुनिकविधिप्रविधीनां प्रयोगः | - डा. बि.वेङ्कट लक्ष्मी नारायणः | 67-70 |
| 15. | संस्कृतशिक्षणस्य आधारः, दार्शनिकचिन्तनम् ; एका दृष्टिः | - डा. सुशान्तहोता | 71-75 |
| 16. | संस्कृतशिक्षकाय सशिक्षणाधिगमप्रक्रिया | - डा.सगरिकानन्द | 76-79 |
| 17 | Development of Personality and Health of Teachers Through Yoga | - DASARI RAGHURAM | 80-82 |
| 18. | दर्शनदृशा अध्यापकेषु व्यक्तित्वविकासोन्नयनम् | - प्रगतिदीक्षित | 83-87 |
| 19. | पञ्चतन्त्रे प्रतिपादितानि अध्यापकेषु सामाजिकतायाः विकासात्मकतत्त्वानि | - जी. उमानरसिंहमूर्तिः | 88-92 |
| 20. | समस्यासमाधानक्षमतोन्नयने मार्गदर्शनपरामर्शयोः व्यूहानाम् आवश्यकता | - आलपाटि.पवनकुमारः | 93-98 |
| 21. | अध्यापकेषु मानवमूल्याभिवर्धनम् | - गोविन्द सरकारः | 99-102 |
| 22. | अध्यापकानां व्यक्तित्वविकासः | - हेमन्तदत्तः | 103-105 |
| 23. | अभिव्यक्तिकौशलविकासे नवीनप्रवृत्तयः | - अमृता कौर | 106-108 |
| 24. | अध्यापकेषु मानवमूल्याभिवर्धनम् | - स्मिषा वी.डी | 109-113 |
| 25. | अध्यापकेषु व्यक्तित्वविकासः | - मृत्युञ्जयचक्रवर्त्ती | 114-118 |
| 26. | अध्यापकेषु मानवमूल्याभिवर्धनम् | - योगेन्द्रकुमारः | 119-122 |

27. आदर्शवादपरिप्रेक्ष्ये अध्यापकेषु मानवमूल्याभिवर्धनम् - शिवेन माजी 123-126

28. अध्यापकों में शिक्षणकौशलोन्नयन - जितेन्द्रकुमार गुप्ता 127-129

29. छात्राध्यापकों में शैक्षिक कौशलोन्नयन - रामजियावन 130-139

30. भवभूतिकृतिषु शैक्षिकतत्त्वानि - एल्.वी. सुब्बाराव: 140-142

31. अध्यापकानां व्यावसायिकशैक्षिकक्षमतोन्नयने विविधसर्वकारीयसङ्गठनानि - डा. राकेशकुमारजैन: 143-147


परियोजना:


1. शिक्षाशास्त्रविभागीयभाषाबोधनवर्गस्य प्रतिवेदनम् - पाणिनिवर्ग: 148-149

2. केन्द्रीयमाध्यमिकशिक्षापरिषद: अष्टमकक्षाया: पाठ्यपुस्तकसमीक्षा - कात्यायनवर्ग: 150-152

3. महाराष्ट्रराज्यमाध्यमिकशिक्षाया: संस्कृतपाठ्यपुस्तकसमीक्षणम् - पतञ्जलिवर्ग: 153-155

4. नवशिक्षानीते:समीक्षणम् - भर्तृहरिवर्ग: 156-161

5. परिसरे आयोजिता: विविधा: कार्यक्रमा: - मम्मटवर्ग: 162-164

6. संस्कृतशिक्षणे सूचनाप्रद्योगिकी - चरकवर्ग: 165-167

7. संस्कृतशिक्षणे WIKI PEDIA इत्यस्य उपयोगिता - कणादवर्ग: 168-170

1. परोशिष्टम्—शिक्षाशास्त्रछात्राध्यापकसूची (गृहसङ्केतसम्पर्क) 1-4

## धन्यवादकुसुमानि

राष्ट्रियसंस्कृतसंस्थानस्य क.जे.सोमैयासंस्कृतविद्यापीठस्य शिक्षाशास्त्रि-द्विवर्षीयपाठ्यक्रमे प्रथमवर्षे शैक्षिकसत्रेऽस्मिन् (2015-16) प्रायोगिकगति-विधिष्वन्यतमः विद्यालयावबोधः प्रमुखः कार्यक्रमः भवति । अत्र छात्राध्यापकानां विद्यालयस्थक्रियाकलापानां तत्रत्याभिलेखानाम् अध्यापकानां शिक्षणविधीनां परिचयो विधीयते । अयं विद्यालयावबोधकार्यक्रमः दि.07.03.2016 तः 12.03.2016 पर्यन्तं श्रीविवेकानन्दहिन्दी हाईस्कूल्, एस्.के. सोमैयाविनयमन्दिर, चेम्बूरहाईस्कूल् (चेम्बूरएड्युकेशनसोसायटी), डी.जे.दोशी इङ्गलिश मिडियं हाईस्कूल् घाटकोपर इत्येतेषु विद्यालयेषु प्रवृत्तः। कार्यस्यास्य सुचारुसम्पादनार्थ मुम्बईप्रदेशे पूर्वोक्ताः विद्यासंस्थाः सहयोगमकुर्वन्। तेभ्यः विद्यालयप्रमुखेभ्यः प्राचार्येभ्यः अध्यापकेभ्यः कर्मचारिगणेभ्यः, छात्रेभ्यश्च नितरां कार्तज्ञ्यं प्रकटयामः । विशिष्य चेम्बूर् हाईस्कूल्, श्रीविवेकानन्दहिन्दी हाईस्कूल्, घाटकोपरस्थ- डी.जे.दोशी इङ्गलिश मिडियम् हाईस्कूल्, एस्. के. सोमैयाविनयमन्दिरम् इत्येतेषां विद्यालयानां प्राचार्येभ्यश्च, प्रशासकेभ्यः, अध्यापकेभ्यः सम्बद्धकर्मचारिभ्यः सर्वेभ्यः वयं धन्यवादकुसुमानि वितनुमः ।

अपि च संगणकानुप्रयोगकार्यशाला परिसरेस्मिन् शिक्षाशास्त्रविभागे दि.01.03.2016 तः 02.03.2016 पर्यन्तं सम्पन्ना । अस्यां कार्यशालायां सुश्री वैशाली संगणकशिक्षिका संगणकप्रयोगकौशलं छात्राध्यापकान् बोधितवती । अतस्तस्यै विभागपक्षतः धन्यवादान् प्रकटीकुर्मः ।

सर्वान्ते विभागीयक्रियाकलापेषु साहाय्यं कृतवद्भ्यः सर्वेभ्यः सन्दर्भेऽस्मिन् आधमर्ण्यं विनिवेदयामः ।

आशास्महे भविष्येऽपि भवतां संस्कृते अनुरागः इतोऽपि वर्धेत इति ।

**शिक्षाशास्त्रविभागः**



योगदिवससन्दर्भे योगासनस्पर्धायां भागग्राहिणः छात्राः निर्णायकाश



शिक्षाशास्त्रिसत्रारम्भकार्यक्रमे समासीनाः अतिथयः



गुरुपूर्णिमाकार्यक्रमे अतिथीनां स्वागतं कुर्वती छात्राध्यापिका




संस्कृतसमाहे अयोजितः कविसम्मेलनकार्यक्रमः




कृतसप्ताहस्य उद्घाटकस्य प्रो.आर्.सी.पण्डामहोदस्य सम्माननं कुर्वन्
प्रो.प्रकाशचन्द्रमहोदयः



प्रो.मदनमोहनझावर्याणां Andriod Apps लोकार्पणं कुर्वन्
श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो.अर्कनाथचौधरीवर्यः



भिविन्यासकार्यक्रमसन्दर्भे विभागीयप्राध्यापकानां कोलकत्ताभ्रमणम्



हिन्दीपखवाडाकार्यक्रमस्य दृश्यम्







अन्तःपरिसरीययुवमहोत्सवे पुरस्कारभाजः विभागीयच्छात्राः ज्योतीरञ्जननन्दः, देवाशिषपण्डा अनुसूयामहन्त च




शिक्षकदिवसकार्यक्रमे मञ्चासीनाः प्राचार्यः अतिथयश्च




शिक्षकदिवसकार्यक्रमे अतिथिभिः सह छात्राध्यापकसमू




वल्लभभाईपटेलजन्मदिवसमुपलक्ष्य समायोजितः राष्ट्रियैकतादिवसः




संविधानदिवससमारोहे मञ्चस्थातिथयः






स्वामिविवेकानन्दजयन्तीसमारोहे आयोजितसङ्गोष्ठ्याः

# RESEARCH DESIGN

(A Thought Content)

Prof. M. Chandrashekhar

**[Investigation is the very instinct nature of a human being; hence he always tries to reveal unknown things. His curiosity promotes him to disclose or uncover the hidden facts. The term research has been coined for scientific and systematic enquiry of things. For that purpose there should be a systematic design of research. In this essay the learned author discusses about research and its design. He also explains features of a good research design. ]**

"Research is a more systematic activity directed towards discovery and the development of an organized body of Knowledge" – **Best J. W. (1977)**

## Introduction

Research is the hallmark of progress of modern society. It is applied to all fields of knowledge in each micro aspects, be it pure Sciences, Social Sciences or the Humanities.

Basically, Research is a process that includes the components for collective inquiry, research design, methodology, data collection and analysis, concluding with the communication of the findings.

Research should never be treated as a piece of compilation work by reading a number of books and compiling their materials in yet another book. Research is always accepted to be something original or a piece of work that advances human knowledge.

According to Kothari C.R.[1], 'Research is an art of Scientific investigation.'

Therefore, the authors define research as an activity which starts with mere search, meticulously executed in the interim and ends with certain interesting and new findings.

Hence, without an ideal research design it is quite impossible to pursue a successful research. So, an effective and intelligent researcher must put earnest efforts of designing his research perfectly suiting to his goal.

**'De Vaus'** in an anthology stated that 'A builder or architect can develop a work plan or order materials they must establish the type of building required, its uses and needs of the occupants. Similarly in social science research the issues of sampling, method of data collection (e.g. Questionnaire, observation, Document analysis), design of questions are all subsidiary to the matter of what evidence does she needs to collect.[2]'

**Meaning of Research Design**

Research design implies that research is rightly planned. The most common use of the words plan and design are probably, where the drawing of building plans or an architectural design invariably precedes the actual Construction of a Building. In this sense there is an occurrence with the term research design as an exposition or blue print of the research project.[3]

More explicitly, Kothari[4] opines one may split the overall research design into the following parts.

a. **The Sample design** which deals with the method of selecting items to be observed for the given study,
b. **The Observation design** which relates to the conditions under which the observations are to be made,
c. **The Statistical design** which concerns with the question of how many items are to be observed and how the information and date gathered are to be analyzed,
d. **The Operational design** which deals with the techniques by which the procedures specified in the sampling, statistical and observational designs can be carried out

**Need for Research Design**

Research design is needed because it facilitates the smooth sailing of various research operations. In fact, it has a great bearing on the reliability of the results arrived at end as such constitutes the firm foundation of the entire edifice of the research work. Even today, many researchers do not realize the importance of research design. As a result thoughtlessness in designing the research project may result in rendering the research exercise futile.

Actually, the design helps the researcher to organize his ideas in a form whereby it will be possible for him to look for flaws and inadequacies.

**Good Research Design : Some features**

Generally, the design which minimizes bias and maximizes the reliability of the data collected and analyzed is considered a good design. It also tells us what observations to make, how to make them and how to analyze the quantitative representations of the observations.

Kothari C. R.[5] is very rightly emphasizes that a good design must take into account the following key factors :

i. The means of obtaining information.
ii. The availability and skills of the researchers and his staff.
iii. The objectives of the problem to be studied.
iv. The nature of the Problem to be studied.
v. The availability of time and money for the research work.

**Concepts Associated with Research Design**

It is quite necessary to know some of the key concepts of Research designs, they are -

a. Dependent & Independent Variables
b. Extraneous Variable
c. Control
d. Confounded Relationship
e. Research Hypothesis
f. Experimental and Non-experimental hypothesis-testing Research.

Since a good research design essentially predicts the progress of research at each step, such as Topic, Title, Objectives, Scope and limitations, hypothesis and thus the design should be flexible and should provide scope for addition, deletion and modification of facets as the research progresses.

**Conclusion**

The Quality of research output principle depends upon Research design while designing a specific research, the researcher has to very smartly abstract the whole thing that he is going to undertake during the research endeavor.

All the hypothetical conceptions pertaining to the given research must be noted at the outset and some selected tentative hypotheses may be formulated to be tested at the end, this is the first and foremost criteria that the researcher follows during the designing phase. Besides, the statistical measures and variables to be studied be nicely chalked out.

Thus, an effective and intelligent researcher must put earnest effort of designing his research perfectly suiting to his goal.

**References.**

1. Kothari, C.R., Research Methodology : Methods and Techniques, New Age, New Delhi, 2004.
2. De Vaus, D. A., Research Design in Social Research, Sage, London, 2001.
3. Mauton, J. and Marous, H. C., Basic Concepts in the Methodology of the Social Sciences. HSRC Publishers, South Africa, 1990.
4. Kothari, C.R., op.cit.
5. Kothari, C.R., op.cit.

✍ **Prof. M. Chandrashekhar**
**Principal**
Rashtriya Sanskrit Sansthan (D. U.)
K. J. Somaiya Sanskrit Vidyapeetham
Vidyavihar, Mumbai – 400 077


ISSN-2395-7921
शिक्षारश्मिः
शिक्षाशास्त्रविभागीयवार्षिकशोधपत्रिका
2018
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्
क. जे. सोमैयासंस्कृतविद्यापीठम्, विद्याविहारः, मुम्बई-७७

## विभागीयप्राध्यापकाः



प्रो. सुदेशकुमारशर्मा
प्राचार्यः



प्रो. मदनमोहनझाः,
विभागाध्यक्षः



डॉ.देवदत्तसरोदे



डॉ.वि.एस्.वि.भास्कररेड्डि



डॉ.कुमारः



सुनीलकुमारशर्मा



डॉ.विनोदकुमारशर्मा



डॉ.सचिनकुमारः

Peer Reviewed Refereed Journal

ISSN : 2395-7921

# शिक्षारश्मिः

## शिक्षाशास्त्रविभागीयवार्षिकशोधपत्रिका

(सन्दर्भिता मूल्याङ्किता च शोधपत्रिका)

Annual Research Journal of Department of Education

## 2017 - 18

ख्यातं राष्ट्रियसंस्कृतं सुमहितं संस्थानमद्याखिलं
वाणीवैभवमातनोति नितरां राष्ट्रे चतुर्दिग्भवम्।
तत्रासौ निजगौरवेण महता सारस्वतं भासयन्
सोमय्याभुवि भासते परिसरो विद्याविहारे स्थितः।।

संरक्षकः

आचार्यः परमेश्वरनारायणशास्त्री,
कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम् (मा. वि.) नवदेहली

प्रधानसम्पादकः

आचार्यः सुदेशकुमारशर्मा
प्राचार्यः, क. जे. सोमैयासंस्कृतविद्यापीठम्, मुम्बई

सम्पादकाः

आचार्यः मदनमोहनझाः    डॉ. वि. यस्. वि. भास्कररेड्डि    डॉ. देवदत्तसरोदे

सह-सम्पादकाः

डॉ. कुमारः    डॉ. विनोदकुमारशर्मा
डॉ. सुनीलकुमारशर्मा    डॉ. सचिनकुमारः

राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः (पूर्वम्) मुम्बई - 400077

| | | |
|---|---|---|
| पत्रिकानाम | : | शिक्षारश्मिः (शिक्षाशास्त्रविभागीयवार्षिकशोधपत्रिका) |
| प्रकाशकः | : | शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतसंस्थानम् ( मा. वि.), मुम्बई - 77 |
| © प्रतिलिप्यधिकारः | : | प्रकाशकाधीनः |
| **ISSN** | **:** | **2395-7921** |
| संरक्षकः | : | आचार्यः परमेश्वरनारायणशास्त्री, कुलपतिः |
| प्रधानसम्पादकः | : | आचार्यः सुदेशकुमारशर्मा, प्राचार्यः |
| सम्पादकाः | : | प्रो. मदनमोहनझाः डॉ. वि. यस्. वि. भास्कररेड्डि<br>डॉ. देवदत्तसरोदे |
| सह-सम्पादकाः | : | डॉ. कुमारः डॉ. विनोदकुमारशर्मा<br>डॉ. सुनीलकुमारशर्मा डॉ. सचिनकुमारः |
| सम्पादकमण्डलसदस्याः | : | आचार्यः मदनमोहनझाः डॉ. देवदत्तसरोदे<br>डॉ. वि. यस्. वि. भास्कररेड्डि डॉ. कुमारः<br>डॉ. विनोदकुमारशर्मा डॉ. सुनीलकुमारशर्मा<br>डॉ सचिनकुमारः सुश्री वैशाली निवडुंगे<br>शुभलक्ष्मी सामल बिनायक बारिकश्च (छात्रसदस्यौ, द्वितीयवर्षम्)<br>प्रियदर्शिनी होता फिरोज साहु (छात्रसदस्यौ, प्रथमवर्षम्) |
| मूल्याङ्कनमण्डलम् | : | प्रो. ए. पी. सच्चिदानन्दः प्रो. प्रकाशचन्द्रः<br>प्रो. लोकमान्यमिश्रः प्रो. गोपीनाथशर्मा<br>प्रो. प्रह्लादजोशी प्रो. वै. एस्. रमेशः<br>प्रो. रजनी रञ्जन प्रो. के. भारतभूषणः |
| काशनवर्षम् | : | 2018 |
| नुकृतयः | : | 200 |
| त्रचित्रविन्यासः | : | आचार्यः मदनमोहनझाः |
| रसंयोजनम् | : | डॉ. वि. एस्. वि. भास्कररेड्डि |
| धातव्यम् | : | शोधपत्रिकायाममुष्यां प्रकाशितशोधपत्राणां मौलिकत्वस्य तत्र प्रतिपादितविचारस्य च कृते समग्रमुत्तरदायित्वं शोधपत्रलेखकानामेव भविष्यति, न वा सम्पादकस्य न च प्रकाशकस्य भविष्यतीति विज्ञप्यते। |
| | : | Rank Printers, Mulund (W), Mumbai. |

प्रो. पी.एन्. शास्त्री
कुलपति
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मन्त्रालय, भारत सरकार के अधीन)
('ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद् द्वारा मान्यता प्राप्त)

Prof. P.N. Shastry
Vice-Chancellor
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)

RSkS/VC/Msg/2017-18/165 Date 04.03.2018

## शुभाशंसनम्

मार्गद्वयं तत्त्वबोधनाय योग्यम् । एकत्र शास्त्रचर्चा अपरत्र शास्त्रचिन्तनाय अवसरः इति । तस्मिन् एव प्रसङ्गे विविधा आचार्याः सुतरां प्रेरणामुखेन नूतनगवेषणकार्ये लग्नास्सन्तः सततं किमपि साधयितुं प्रयतन्ते, तेषां शोधमुखलेखाः विचारावगाहाः च समाजाय नूतनां गतिं प्रददति । अस्मिन् एव प्रसङ्गे मुम्बईपरिसरस्य **"शिक्षारश्मिः"** इतिनाम्नी पत्रिका यशस्विनां प्राचार्याणां, कार्यकुशलानां विभागाध्यक्षाणां च मार्गदर्शने सततं यशः प्राप्नोतु इति मंगलाशासनं विधीयते, ये केऽपि अस्मिन् साहित्यसर्जनात्मके पूतकार्ये लग्नाः सन्ति तेभ्यः सर्वेभ्यः शुभकामनाः दीयन्ते, भगवती मुम्बादेवी च प्रार्थ्यते इयं पत्रिका विदुषां शोधच्छात्राणां सामाजिकानां च मार्गदर्शनं कुर्यादिति।

प.ना. शास्त्री
**(प्रो. परमेश्वरनारायणशास्त्री)**

56-57, Institutional Area, Janakpuri, New Delhi-110058 Ph.: (O) 28523949 (Fax) 28521948
EPABX : 28524993, 28521994, 28524995 E.Mail : rskspvc@yahoo.com

**आचार्यः ए. पि. सच्चिदानन्दः**
प्राचार्यः (प्र)
राष्ट्रियसंस्कृतसंस्थानम्,
(मानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी – 577 139

**Prof. A. P. Sachidananda**
Principal (I/C)
**RASHTRIYA SANSKRIT SANSTHAN**
(Deemed University under MHRD Govt. of India)
Rajiv Gandhi Campus, Sringeri - 577 139

## समेधतां शिक्षारश्मिः

अस्माकं प्राज्ञो मनीषिणस्तपस्विनो महर्षयो वेदवेद्यान् विचारान् समाकलय्य मानवजन्मनो लक्ष्यावाप्तये शास्त्राणि निर्ममिरे । तेषामध्ययनमन्तरा कथमपि पुरुषार्थाः प्राप्तुं न शक्यन्त इति सर्वविदितोऽयं विषयः ।

पाश्चात्त्यसंस्कृतेरन्धानुकरणेन, तत्प्रभावितचिन्तनेन च भारतीयसंस्कृतेर्महत्त्वमजानानोऽद्यतनसमाजः असंस्कृतः सन् अनुचिते वर्त्मनि पदं निदधानोऽस्ति । अतः राष्ट्रेण शास्त्राणां समुद्धरणेन समाजे दोषाणामपनोदनं गुणानामाधानं च सेत्स्यतीति बहुपरिसरीयं राष्ट्रियसंस्कृतसंस्थानं प्रतिष्ठापितमस्ति । मुम्बापुर्यां विराजमानं के. जे. सोमय्या संस्कृतविद्यापीठं राष्ट्रियसंस्कृतसंस्थानस्य परिसरेष्वन्यतमः । विद्यापीठमिदं शास्त्राणां संस्कृतस्य संस्कृतेश्च संरक्षणे विकसने च बद्धादरं सत् निष्प्रत्यूहं नानाविधकार्याणि निर्वहति । तत्र विविधशास्त्रनदीष्णैरन्वितेन शिक्षाशास्त्रविभागेन प्रतिवर्षमिवास्मिन्नपि संवत्सरे **"शिक्षारश्मिः"** इति वार्षिकशोधपत्रिकेयमाविष्क्रियत इति प्रमुदिता वयम् । विद्वज्जनलेखभूयिष्ठं पत्रिका समेषामुपकारं तनिष्यतीति मे महान् विश्वासः ।

सन्दर्भेऽस्मिन् परिसरप्राचार्यान् विदुषः **आचार्यसुदेशकुमारशर्मवर्यान्**, अभिनन्दामः ये बहुविधकार्येष्वपि दत्तमानसाः कार्यमिदं सम्पादितवन्तः । शिक्षाशास्त्रविभागाध्यक्षान् प्रो. मदनमोहनझावर्यान् विभागीयप्राध्यापकान् सर्वान् पौनःपुन्येन अभिनन्दामः । एतादृशकृतिभिः शिक्षाशास्त्रविभागः वरीवृद्ध्यताम् इत्याशास्महे ।

हेमलम्बफाल्गुनशुक्लदशमी
भानुवासरः, २५-०२-२०१८

विद्वज्जनविधेयः
**प्रो. ए. पि. सच्चिदानन्दः**

# राष्ट्रिय-संस्कृत-संस्थानम्

(मानितविश्वविद्यालयः)

क. जे. सोमैया संस्कृतविद्यापीठम्, विद्याविहारः, मुम्बई - 77

Ph. 022-21025482, 21025452,

E-mail: rsksmumbai@yahoo.com www.rsksmumbai.in

प्रो. सुदेशकुमारशर्मा

प्राचार्यः


## शुभकामनासन्देशः

संस्कृतसंवर्धनकालः प्रवर्ततेऽधुना । जनानां संस्कृतं प्रति सुतरां प्रीतिम् अवलोक्य मोदते मे मनः । साम्प्रतं जनाः भारतीप्रकाशनमुखेन गौरवपूर्णभावेन च संस्कृतं पश्यन्ति । संस्कृताय दृढनिश्चयाः केचन नूतनान् भावान् पालयितुं विशिष्टं सर्जनात्मकं कार्यं कर्तुं यतमानाः सन्ति । अस्मिन्नेव कर्मणि संस्थानस्य यशस्विकुलपतिवर्याणां मार्गदर्शने सततं प्रेरणादायककार्याणि चलन्ति, यानि सर्वस्य संस्कृतजगतः वर्धनात्मकानि सन्ति । पत्रिकोपनिबद्ध-शोधलेखाः **शिक्षारश्मि** इति पत्रिकायाः जनानां मार्गदर्शनाय प्रेरयिष्यन्ति । अस्मिन्नवसरे कुलपतिभ्यः हार्दं धन्यवादं ज्ञापयामि, ये सततं शैक्षणिककार्याय प्रेरयन्ति । तथा विभागाध्यक्षप्रमुखान्, सम्पादकान्, सहसम्पादकान् सर्वान् आचार्यान्, छात्रान् च प्रति शुभमङ्गलाशासनं कथयामि यतः सर्वैः अस्यै पत्रिकायै उचितं स्वरूपं प्रदत्तमिति ।

(प्रो. सुदेशकुमारशर्मा )

फाल्गुनपूर्णिमा, वि. सं. २०७४,

दिनाङ्कः- ०१-०३-२०१८

# राष्ट्रिय-संस्कृत-संस्थानम्

(मानितविश्वविद्यालयः)

लखनऊ परिसरः, गोमतीनगरम्, लखनऊ.

Ph. 9451170647

**प्रो. लोकमान्यमिश्रः**

आचार्यः विभागाध्यक्षश्च

शिक्षाशास्त्रविभागः


## शुभकामनाः

स्वनामधन्या शिक्षारश्मिः वस्तुतः सर्वत्र शिक्षायाः प्रसाराय सन्नद्धेति प्रतिभाति । तत्र प्रकाशिताः लेखाः शिक्षायाः नवीनान् विषयान् प्रतिपादयन्ति । भारते शिक्षाशास्त्रे कृतभूरिपरिश्रमाणां विदुषां लेखा एतस्यां शोधपत्रिकायां प्रकाश्यन्ते । संस्कृतमाध्यमेन लेखानां प्रकाशनं संस्कृतशिक्षायाः विकासायैव प्रतीयन्ते । विभागीय-सम्पादकेभ्यः सहकर्मिभ्यश्च वर्धापनानि।

दिनाङ्कः- ०१-०३-२०१८

**प्रो. लोकमान्यमिश्र**

**प्रो. मदनमोहन झा**
आचार्यः अध्यक्षश्च
शिक्षाशास्त्रविभागः
राष्ट्रियसंस्कृतसंस्थानम्
क.जे.सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः (पूर्व) मुम्बई-77

**PROF.M.M.JHA**
Prof.& H.O.D
Dept.Of Education
RASHTRIYA SANSKRIT SANSTHAN
K.J.SOMAIYA SANSKRIT VIDYAPEETHA
VIDYAVIHAR(E) MUMBAI-77

**MO.NO.9004904059,** **E-MAIL-mmjha44@gmail.com**

## विद्यया विन्दतेऽमृतम्

विश्वस्मिन् यो मानवः स्वजीवने मुक्तिमिच्छन् यशः, प्रभूतिम्, भोगांश्च सर्वान् त्यक्त्वा ज्ञानसम्पादनमार्गमनुसरति स जीवन्मुक्त इत्युच्यते। अत एवोक्तं यथा –

यशः प्रभूतिना यस्मै हेतुनैव विना पुनः।
भोगा इह न रोचन्ते स जीवन्मुक्त उच्यते॥ इति।

एवं भारतीयपरम्परायां विद्यार्जनस्य बहुमुख्यं स्थानं प्राकल्पि । इहलोकयात्रा सुज्ञानेनैव सुष्ठु भवितुमर्हतीति विदुषां वचनमाश्रित्य बहवो मार्गाः अन्विष्टाः । तेष्वन्यतमोऽयमाधुनिको मार्गः शोधलेखप्रकाशनम् । लोकेऽधुना बहुत्र बह्व्यः शोधपत्रिकाः नैकेषां विज्ञानां चिन्तनाभिप्रायविचारादीनां प्रकटनाय प्रकाश्यन्ते । विशेषतः प्रभूतज्ञानभण्डारोपेतसंस्कृतक्षेत्रे एतादृशशोधकार्यं प्रचलतीति प्रमोदस्य विषयः । अस्माकं राष्ट्रियसंस्कृतसंस्थानस्य मनितविश्वविद्यालयस्य क. जे .सोमैयासंस्कृतविद्यापीठाख्ये मुम्बईपरिसरे प्रतिवर्षमिवास्मिन् वर्षे शिक्षाशास्त्रविभागेन **शिक्षारश्मिः** इति वार्षिकशोधपत्रिका प्रकाश्यते यस्यामनेकेषां शिक्षाविदामध्यापकानां ,विभिन्नसंस्थासु कार्यरतानां विदुषां , शिक्षाशास्त्रिकक्ष्यायामध्ययनरतानां छात्राध्यपाकानां गणशो विभज्य प्रदत्तशोधकार्यसम्बद्धानां च शोधलेखानां समावेशो वर्तते । अतः सन्दर्भेऽस्मिन् एतादृशस्य विशिष्टकार्यस्य सम्पादकेभ्यः, छात्रेभ्यः, अधिकारिभ्यश्च सानन्दमभिनन्दनानि वितीर्यन्ते। विशिष्टलेखयुक्तपत्रिकेयं सर्वेभ्यः लोकेभ्यः उपकारिका भवेदित्याशासे।

**प्रो.मदन मोहन झा**

# सम्पादकीयम्

इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम् । यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥ इति महाकवेर्दण्डिनः वचनं शब्दरूपभाषायाः जीवितमाहात्म्यं वर्णयति। यदि भाषा इति किञ्चिद्विशिष्टं साधनं लोके नाभविष्यत् तर्हि लोकव्यवहारो नाभविष्यदित्यत्र नास्ति सन्देहलेशः । भाषां विना परस्परं भावानां विनिमयो न भवेत् मानवानाम्। नैव प्रदर्शयितुं शक्नुयुः पण्डिताः स्वपाण्डित्यपूर्णविचारधाराम्। विना भाषां नैव शक्नुयुः प्राप्तुं मानवाः विभिन्नसंस्कृतीनां, परम्परायाः, सम्प्रदायाणां च परिचयम् । न सुष्ठु शिक्षितः स्याद्बालो विना भाषाम्। अतः लोके भाषां विना नास्ति कश्चिद्विशेषः शिक्षणे इति विश्वस्मिन् भाषाशिक्षणस्य बहुमहत्त्वपूर्णं स्थानं वर्ततेतराम् । न कोऽपि विषयः भाषां विना बोधयितुं शक्यः । अत एवोक्तं दण्डिना वाचामेवप्रसादेन लोकयात्रा प्रवर्तते इति। लोकयात्रायाः मुख्यकारणमेव भाषा।

भाषासु तासु वेदाधारिता देववाणी सुसंस्कृता स्पष्टा शुद्धा मधुरा व्यवस्थिता कल्याणी विविधविद्यापूर्णा लौकिकभाषाणां बह्वीनां जननीति मन्यमाना चानादिकालात् सर्वलोकानां मङ्गलं कुर्वती आद्रीयमाणा लोके दरीदृश्यते। भाषायाः अस्याः अध्ययनाय - गुरुकुलानि, मठाः, आचार्याणामाश्रमाः, नदीसङ्गमतीर्थानि, पाठाशालाः, विद्यालयाः, विश्वविद्यालयाः, विविधविद्याकेन्द्राणि चासन् क्वचित्सन्ति च । यत्र अन्तेवासिनः सपर्यापुरस्सरं सश्रद्धं संस्कृतविद्यामुपासते । अधुना तु शिक्षाव्यवस्था आधुनिकधारायां प्रचलतीत्यतः किञ्चित्परिवर्तिता दृश्यते । साम्प्रतिककाले संस्कृतभाषाशिक्षणाय शास्त्रशिक्षणनिमित्तञ्च संस्कृत-विश्वविद्यालयाः, पाठशालाः, गुरुकुलानि तत्रत्या आचार्याः अध्यापकाः यतमानाः वर्तन्ते । योऽनूचानः स नो महान् इति श्रुतिवचनं बिभ्रद् आराष्ट्रे राराज्यमानं राष्ट्रियसंस्कृतसंस्थानम् अहर्निशं संस्कृतभाषां शास्त्राणि च सेवमानं लोककल्याणं विदधानं सारस्वतसेवासमाराधनतत्परं लोके भृशं शोभतेतमाम् । संस्थानस्यैव त्रयोदशपरिसरेष्वन्यतमः महाराष्ट्रराज्यस्य मुम्बानगर्यां वर्तमानः क. जे. सोमैयासंस्कृतविद्यापीठमित्याख्यः प्रथितयशस्कोऽयं परिसरो विविधविभागयुक्तो राराज्यते । सत्सु विभागेष्वनेकेषु शिक्षाशास्त्रविभागो विद्यते विशिष्टो यत्र वर्षद्वयस्य पाठ्यक्रमे त्रिनवतिः छात्राः अधीयानाः वर्तन्ते । विभागोऽयं सर्वत्र ज्ञानं वितन्वन् प्रतिवत्सरमिवास्मिन् हायनेऽपि शिक्षारश्मिरिति अनेकेषां विदुषां छात्राणां च विविधशोधलेखयुक्तां वार्षिकीं शोधपत्रिकां प्राकाशयतीति वक्तुं मोदामहे। राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य कुलपतिवर्यैः आचार्यैः **परमेश्वरनारायणशास्त्रिभिः** प्रदत्ताशीर्वचनैः, मुम्बई-परिसरप्राचार्यैः **प्रो. सुदेशकुमारशर्मभिः**, विभागाध्यक्षैः **प्रो. मदनमोहनझावर्यैः** प्राप्तप्रोत्साहनेन, विविधश्रेष्ठशिक्षाशास्त्रिणामाचार्याणां शुभाशंसवचोभिः च सम्प्रेरितेयं पत्रिका प्रकाशमेष्यतीति वयममन्दमानन्दमनुभवामः।

इत्थं
सम्पादकाः

# शिक्षाशास्त्रविभागीयगतिविधयः 2017-18

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनेन १९८३ तमे वर्षे संस्थापितेन राष्ट्रियसंस्कृत-संस्थानेन संस्कृतभाषायाः स्वाध्यायप्रवचनशिक्षणार्थं शिक्षाशास्त्रविभागः समुपास्थापि । संस्थानान्तर्गतेषु त्रयोदशपरिसरेषु क.जे. सोमैयासंस्कृतविद्यापीठाख्योऽयं परिसरः मुम्बईनगरे राराष्टि । परिसरेऽस्मिन् व्याकरण-साहित्य-ज्योतिषविभागैः साकं शिक्षाशास्त्रविभागोऽपि राराज्यते ।

२००६ तमे वर्षे महाराष्ट्रराज्ये संस्कृतशिक्षक-प्रशिक्षणार्थं शिक्षाशास्त्रविभागोऽयं समारभ्यत । परिसरस्यास्य प्रथमप्राचार्याः भवन्ति प्रो. प्रकाशचन्द्रमहोदयाः । तथा प्रथमशिक्षाशास्त्रविभागाध्यक्षाः भवन्ति प्रो. लोकमान्यमिश्रमहोदयाः । अधुना विभागोऽयं प्राचार्याणाम् आचार्याणाम् सुदेशकुमारशर्ममहोदयानां मार्गदर्शने, आचार्याणां मदनमोहनझामहोदयानाम् विभागाध्यक्ष्ये भारते एव सर्वोत्कृष्टशिक्षाविभागेषु अन्यतमत्वेन विराजते । परिसरममुं विभिन्नेभ्यः प्रान्तेभ्यः आभारतात् शिक्षाशास्त्रम् अध्येतुं छात्राः समायान्ति ।

विभागस्यास्य मुख्यभूमिका तावती उत्तमोत्तमाध्यापकानां निर्मितिः । छात्राध्यापकेषु शिक्षण -कौशलानि प्राशासनिकक्षमता, संस्कृतसम्भाषणदक्षता, प्रायोगिक-व्यावहारिक-प्राविधिक-मनोवैज्ञानिक-विज्ञानज्ञानानुप्रयोग -क्षमतादीनां सम्पादनं विभागस्य प्रमुखं लक्ष्यं विद्यते । तल्लक्ष्यप्राप्त्यर्थं श्रेष्ठाध्यापकानां समवायोऽत्र निर्मास्यते ।

**वर्तमानशिक्षाशास्त्रविभागीयाध्यापकाः**

| क्र. सं | अध्यापकस्य नाम | पदम् | सेवायाः कालावधिः |
|---|---|---|---|
| 01 | प्रो. मदनमोहनझाः | आचार्यः विभागाध्यक्षश्च | 2011 तः अद्यावधि |
| 02 | डा. देवदत्तसरोदे | सहायकाचार्यः (वरिष्ठः) | 2006 तः अद्यावधि |
| 03 | डा. वि.एस्.वि. भास्कररेड्डि | सहायकाचार्यः (वरिष्ठः) | 2006 तः अद्यावधि |
| 04 | डा. कुमारः | संविदाध्यापकः | 2015 तः अद्यावधि |
| 05 | डा. सुनीलकुमारशर्मा | संविदाध्यापकः | 2015 तः अद्यावधि |
| 06 | डा. विनोदकुमारशर्मा | संविदाध्यापकः | 2016 तः अद्यावधि |
| 07 | डा. सचिनकुमारः | संविदाध्यापकः | 2018 तः अद्यावधि |

गतषड्वर्षेषु छात्राणां परिणामादिविवरणम् -

| क्रम.सं. | शैक्षिकसत्रम् | नामाङ्कित-छात्राः | उत्तीर्णछात्राणां प्रतिशतम् | प्रथमश्रेणी-छात्रप्रतिशतम् | विशेषाङ्कप्राप्त-छात्राः |
|---|---|---|---|---|---|
| 01 | 2011-12 | 49 | 100 | 49 | 11 |
| 02 | 2012-13 | 57 | 100 | 57 | 43 |
| 03 | 2013-14 | 63 | 100 | 62 | 01 |
| 04 | 2014-15 | 93 | 97 | 67 | 30 |
| 05 | 2015-17 | 48 | 100 | 100 | — |
| 06 | 2016-18 | 45 | द्वितीयवर्षे अधीयानाः | | |
| 07 | 2017-18 | 48 | प्रथमवर्षे प्रविश्याधीयानाः | | |

**छात्रोपलब्धयः -**

महतः प्रमोदस्य विषयोऽयं यत् परिसरे ये छात्राः शिक्षाशास्त्रिकक्ष्यामुत्तीर्य गताः ते सर्वेऽपि प्रायः उत्तमक्षेत्रेषु उत्तमोद्योगं प्राप्तवन्त इति । तत्र केचन केन्द्रसर्वकारीयाभिकरणेषु, केचन केन्द्रीयविद्यालयेषु, डी.ए.वी. संस्थासु, विभिन्नराज्यस्तरीयविद्यालयेषु, दिल्ली-स्वायत्त-विद्यालयेषु, सामान्यविद्यालयेषु च कार्यं निर्वहन्ति । तथैव केचन छात्राः विश्वविद्यालयस्तरेऽपि उपाधिधारिणः वर्तन्ते । अधुना सोमैयासंस्थायाः सहयोगेन शिक्षकाणां परिसरीयचयनमपि प्रचलति ।

**2017-18 शिक्षाशास्त्रविभागीयगतिविधयः —**

शैक्षिकसत्रेऽस्मिन् द्वितीयवर्षेऽधीयानाः 45, प्रथमवर्षे प्रविष्टाः 48 छात्राध्यापकाः वर्तन्ते । ते च महाराष्ट्र - राजस्थान - गुजरात - मध्यप्रदेश - उत्तरप्रदेश - उत्तराखण्ड - नेपाल - पश्चिमबङ्गाल - ओडिशा - बिहारप्रान्तेभ्यः समागताः । अस्मिन् वर्षे सत्रारम्भः 19.06.2017 दिनाङ्कतः समभूत् । विभागेऽस्मिन् छात्राणां बौद्धिकविकासाय बहवः कार्यक्रमाः शैक्षिकगतिविधयश्च समायोजिताः । ते यथा -

| | |
|---|---|
| 1. अन्ताराष्ट्रिययोगदिवसः | 21-06 - 2017 |
| 2. सरस्वतीपूजनं सत्रारम्भश्च | 05 - 07 - 2017 |
| 3. द्वितीयवर्षस्य कक्ष्यारम्भः | 03 - 07 - 2017 |
| 4. गुरुपूर्णिमाकार्यक्रमः | 19-07-2017 |
| 5. सम्भाषणशिबिरम् | 20 जुलै 2017 तः 29 जुलै 2017 पर्यन्तम् |
| 6. २१ दिनात्मकभाषाबोधनवर्गः | 20 जुलै 2017 तः 10 अगष्ट 2017 पर्यन्तम् |
| 7. संस्कृतसप्ताहः | 08 अगस्त 2017 तः 11 अगस्त 2017 पर्यन्तम् |
| 8. वाग्वर्धिनीसभायाः उद्घाटनम् | 28-07-2017(प्रतिशुक्रवासरं मध्याह्ने सभा) |

| | |
|---|---|
| | 09अगस्त 2017 तः 30 अगस्त 2017 पर्यन्तम् |
| 9. नवभारतसङ्कल्पः | 01 सप्टम्बर 2017 तः 15 सप्टम्बर 2017 |
| 10. स्वच्छताभियानपक्षः | 04 - 09 - 2017 |
| 11. विशिष्टसङ्गोष्ठीव्याख्यानम् | 06 - 09 - 2017 |
| 12. शिक्षकदिवसः | 14 - 09 - 2017 तः 20 - 09 - 2017 |
| 13. हिन्दीपखवाडा | 14 - 09 - 2017 तः 20 - 09 - 2017 |
| 14. पं. दीनदयाल उपाध्याय जन्मशताब्दी | 30 - 10 - 2017 तः 04 - 11 - 2017 |
| 15. सतर्कताजागरूकतासप्ताहः | 09 - 11 - 2917 तः 11 - 11 - 2017 |
| 16. प्राविधिककार्यशाला सङ्गोष्ठी च | डिसम्बरमासस्य तृतीय-चतुर्थसप्ताहे 2017 |
| 17. सूक्ष्मशिक्षणप्रशिक्षणम् | 12-08-2017 |
| 18. शोभायात्रा | 12-08-2017 |
| 19. वीथीनाटकम् | 18 - 09 - 2017 तः 15 दिसम्बर 2017 |
| 20. शिक्षणाभ्यासः | 29 जनवरी 2018 तः 30 जनवरी 2018 |
| 21. प्रायोगिकशिक्षणपरीक्षा | 2018 मार्च 08 तः 11 दिनाङ्कपर्यन्तम् |
| 22. युवमहोत्सवः | 01 फरवरी 2018 तः 02 फरवरी 2018 पर्यन्तम् |
| 23. मनोविज्ञानपरीक्षा | 08 फरवरी 2018 तः 09 फरवरी 2018 |
| 24. राष्ट्रियसङ्गोष्ठी विशिष्टव्याख्यानञ्च | 26 मार्च 2018 |
| 25. आदर्शसाक्षात्कारः | 10-04-2017 तः 26-04-2017 |
| 26. वार्षिकपरीक्षाः | |

**अध्ययनार्थं सौविध्यानि —**

परिसरेऽस्मिन् छात्राणाम् अध्ययनार्थं सर्वप्राविधिकमनोवैज्ञानिककक्षाप्रकोष्ठः विद्यते । प्रकोष्ठेऽस्मिन् सङ्गणकध्वनिमुद्रिकाप्रक्षेपकयन्त्रैः दैनन्दिनपाठनं भवति । तथैव छात्राणां कौशलाभिवर्धनार्थम् आर्थिकसौलभ्यार्थञ्च इमानि सौविध्यानि वर्तन्ते ।

**१. छात्रवृत्तिः -** शिक्षाशास्त्रिकक्षायां 27 छात्राः स्वशैक्षिकयोग्यतानुगुणं प्रतिमासं अष्टशतं (८००/-) रुप्यकाणां छात्रवृत्तिं प्राप्नुवन्ति ।

**२. सङ्गणकप्रयोगशाला -** छात्राणां प्राविधिकसङ्गणकीयकौशलान्यभिवर्धयितुं सङ्गणकप्रयोगशाला स्थापिता । यत्र पञ्चदशाधिकसङ्गणकानि उपलब्धानि । तदर्थं सुश्री वैशाली निवडुंगे इति संगणकीया प्राध्यापिका नियुक्ता वर्तते।

**३. मनोविज्ञानप्रयोगशाला —** पाठ्यक्रमानुगुणं मनोविज्ञानप्रयोगान् कर्तुं यथासंख्यं पर्याप्तोपकरणानि विद्यन्ते । तथा पाठ्यक्रमेतरोपकरणानि अपि उपलब्धानि वर्तन्ते । तेषु अवधान-व्यक्तित्व-बुद्धि-अभिरुचि-अभिवृत्ति-चिन्तनविषयकाध्ययनार्थं मनोवैज्ञानिकोपकरणानि सन्ति ।

४. **विभागीयग्रन्थालयः** — **परिसरीयबृहद्ग्रन्थालयम**तिरिच्यविभागीयग्रन्थालये छात्रैः पाठ्यक्रमविषयाः अध्येतुं पुस्तकानि **यथेष्टं स्वीकर्तुम् अवसरः** प्रदीयते । तथैव ग्रन्थालयेऽस्मिन् १५०० पुस्तकानि पाठ्यक्रमसम्बद्धानि पाठ्यक्रमेतराणि अनुसन्धानविषयनिष्ठानि संस्कृतभाषादक्षतोत्पादकानि उच्चतरशिक्षापिपठिषूणां पिपासोपशमार्थम् उपलभ्यन्ते ।

५. **ई-ग्रन्थालयः** — प्रायः त्रिसहस्राणाम् ई-ग्रन्थानां सक्रमोपलब्धिः सङ्गणकप्रयोगशालायां विद्यते । तत्र यथेष्टं छात्राः सर्वविधपुस्तकानि सङ्गणकद्वारा पठितुं शक्नुवन्ति ।

६. **प्रविधिप्रयोगशाला** — छात्राणां प्राविधिकज्ञानार्थम्, उपकरणनिर्माणार्थम्, सङ्गणकमाध्यमेन पाठनाभ्यासं कर्तुं पर्याप्तोपकरणानि प्रविधिप्रयोगशालायां विद्यन्ते ।

७. **क्रीडाविभागः** — छात्राणां सर्वाङ्गीणविकासार्थं क्रीडयितुं च डा. शङ्कर आन्धले इति क्रीडाप्रशिक्षकः वर्तते । यस्य मार्गदर्शने सोमैयापरिसरीयप्राङ्गणेषु शारीरिक-बौद्धिकक्रीडाः क्रीडितुम् अवसराः कल्प्यन्ते ।

**विभागे शोधावसराः —**

छात्रैः विद्यावारिधिः (Ph.D.) इत्युपाधिं प्राप्तुं सुयोग्याः मार्गदर्शकाः विद्यन्ते । शोधविभागेऽस्मिन् शिक्षाशास्त्रसम्बद्धाः छात्राः तथा आधुनिकसंस्कृतविज्ञानशोधचिकीर्षवः तथा विभिन्नक्षेत्रेषु शोधं विधातुं पर्याप्तावसराः कल्पिताः । अधुना विभागेऽस्मिन् पञ्चशोधच्छात्राः (5) स्वीयमनुसन्धानं सम्पादयन्तः विद्यन्ते।

इत्थं सर्वविधसाधनैः साकं परिसरीयशिक्षाशास्त्रविभागोऽयं सर्वेषां छात्राध्यापकानां शोधोत्सुकानां प्रोत्साहनं वितन्वन्, छात्राणाञ्च शिक्षणकौशलानि अभिवर्धयन् वरीवर्ति ।



सत्रारम्भे यज्ञम् आचरन्तः प्राचार्यः प्राध्यापकाः छात्राश्च ।



वसन्तपञ्चमीपर्वणि सरस्वतीपूजनं कुर्वन्तः प्राचार्यः प्राध्यापकाः छात्राश्च ।

# विषयानुक्रमणिका


| क्रं.सं | शोधपत्रस्य शीर्षकम् | लेखकः | पृष्टसंख्या |
|---|---|---|---|
| 1. | उत्तरम् | प्रो. मदनमोहनझाः | 01 |
| 2. | सङ्गणकसहकृतभाषाशिक्षणम् | डॉ. देवदत्तसरोदे | 08 |
| 3. | सूचनाधिकारस्य जागरणे शिक्षायाः भूमिका | डॉ. वि. एस्. वि. भास्कररेड्डि | 18 |
| 4. | भाषाशिक्षणे मूल्याङ्कनस्य नूतनविधयः | डॉ. विनोदकुमारशर्मा | 25 |
| 5. | संस्कृतभाषाधिगमे भाषाप्रयोगशालायाः भूमिका | डॉ. सचिनकुमारः | 31 |
| 6. | समासानामधिगमे रेखीयाभिक्रमस्योपयोगिता | डॉ. कुमारः | 37 |
| 7. | भाषाशिक्षण में सूक्ष्मशिक्षण की उपयोगिता | डॉ. सुनीलकुमारशर्मा | 43 |
| 8. | Language laboratory: An Innovative technique | Dr. Shweta Sood | 51 |
| 9. | Significance of Evaluation and Assessment in Language proficiency | Dr. Leena | 57 |
| 10. | Using Computers in Language Teaching | Dr. SubhashChander Meena | 62 |
| 11. | How to enhance Sanskrit E-Learning by using Blog | Dr. Arti Sharma | 65 |
| 12. | Creating Sanskrit Web pages by using Hypertext Markup Language | Ms. Vaishali Nivadunge | 70 |
| 13. | संस्कृतशिक्षण में नवाचार : ई- अधिगम की भूमिका | डॉ. प्रेमसिंह सिकरवारः | 75 |
| 14. | भाषाशिक्षणशास्त्रशिक्षणयोः नवाचाराः | डॉ. गणपति वि. हेगडे | 82 |
| 15. | भाषाशिक्षणे मूल्याङ्कनस्य नूतनविधयः | डॉ. मनमोहनतिवारी | 86 |
| 16. | भाषाशिक्षणे सूक्ष्मशिक्षणम् | डॉ. माधवदत्तपाण्डेयः | 90 |
| 17. | भाषाशिक्षणे सङ्गणकयन्त्रम् | अलोकमण्डलः | 94 |
| 18. | भाषाशिक्षणे मूल्याङ्कनस्य नूतनविधीनाम् आलोचनात्मकमध्ययनम् | पलाशमण्डलः | 103 |
| 19. | भाषाशिक्षणे संङ्गणकस्य अनुप्रयोगः | जीतेन्द्रकुमारगुप्तः | 108 |
| 20. | भाषाशिक्षणे मनोवैज्ञानिकसम्प्रत्ययानाम् अनुप्रयोगः | रामजियावनप्रजापतिः | 111 |
| 21. | साकल्यशिक्षा साकल्यविद्यालयस्य च सम्प्रत्ययः संसाधनानि उपलब्धता च | मम्मटवर्गः | 115 |

| | | |
|---|---|---|
| 22. मानवाधिकाराणां संरक्षणे राष्ट्रियमानवाधिकारायोगस्य भूमिका | आनन्दवर्धनवर्गः | 121 |
| 23. सक्रियपाठ्यचर्यानुभवोत्पादने शिक्षकस्य भूमिका | वामनवर्गः | 129 |
| 24. अधिगममूल्याङ्कने केन्द्रीयप्रवृत्तिमापनानाम् अनुप्रयोगः | कुन्तकवर्गः | 134 |
| 25. अष्टादशशास्त्राणां परिचयः | दण्डिवर्गः | 143 |
| 26. व्यक्तित्वस्य सिद्धान्ताः | पाणिनिवर्गः | 158 |
| 27. पर्यावरणपरिरक्षणे विविधाभिकरणानां भूमिका | भर्तृहरिवर्गः | 166 |
| 28. संस्कृतभाषाशिक्षणकौशलानि तत्संवर्धनोपायाश्च | कात्यायनवर्गः | 170 |
| 29. भाषाशिक्षणे अन्तर्जालस्य प्रयोगः शैक्षिकोपग्रहश्च | पतञ्जलिवर्गः | 177 |
| 30. भारतीयसंविधाने निहितानां शिक्षासम्बद्धानाम् अनुसूचीनाम् अधिनियमानाञ्च संग्रहणम् | जयादित्यवर्गः | 183 |


*****

# उत्तरम्

प्रो. मदनमोहनझाः *

शिक्षणाधिगमप्रक्रियायां यथा प्रश्नः महत्त्वपूर्णः भवति, तथैवोत्तरमपि महत्त्वपूर्णं भवति । प्रायः कक्षायां छात्राः अपूर्णं दोषपूर्णञ्चोत्तरं ददति । अस्य कारणं स्वयमध्यापकः एव भवति । यतः सः उत्तरनिष्कासने दक्षः न भवति। अतः छात्राध्यापकाः उत्तराणां महत्त्वं ज्ञात्वा उत्तरनिष्कासने दक्षाः भवेयुः । उत्तराणां महत्त्वं गार्लिकमहोदयः प्रतिपादयति -

1. उत्तरप्रदाने अवधानस्यावश्यकता भवति। अतः समुचितोत्तरप्रदानेन छात्राणामवधानं केन्द्रितं भवति।
2. उत्तरप्रदानार्थं विचारस्यावश्यकता भवति। फलतः उत्तरप्रदानेन छात्राणां तर्कस्य प्रशिक्षणं भवति।
3. छात्राणां स्मृति निश्चितरूपेण कार्यं करोति। बाध्यतया एव भवतु, परं सा स्मृति अवश्यमेव कार्यं करोति।
4. उत्तरमाध्यमेन छात्राणां मानसिकीक्रिया जागरिता भवति। फलतः छात्राणां बुद्धिः प्रखरा भवति।
5. उत्तराणां माध्यमेन छात्राः अध्यापकाश्च शिक्षणस्य पाठस्य वा क्रमपूर्णयोजनस्य ज्ञानं प्राप्नुवन्ति।
6. अनेन पाठस्य शिक्षणे प्राप्तसाफल्यस्य ज्ञानं भवति।

**उत्तमोत्तराणां गुणाः—**

1. **शुद्धा भाषा-**

छात्रप्रदत्तमुत्तरं भाषादृष्ट्या, व्याकरणदृष्ट्या च पूर्णरूपेण शुद्धं स्यात् । उत्तराणां भाषायाः संशोधनं केवलं भाषाध्यापकानामेव कार्यं नास्ति, अपितु सर्वे अध्यापकाः विषयेऽस्मिन् अवधानं दद्युः ।

2. **उचिता भाषा-**

उत्तरप्रदाने केवलं लैखिकभाषायाः प्रयोगः कर्त्तव्यः। गृहे प्रयुक्तायाः वाचने भाषणे प्रयुक्तायाश्च भाषायाः प्रयोगः प्रश्नानामुत्तरप्रदानार्थं न करणीयम्। अन्यथा कक्षायां कदाचित् बालकाः हसेयुः ।

3. **एका भाषा-**

उत्तराणां भाषा एका एव स्यात्। कदाचिच्छात्राः उत्तरप्रदानार्थं अन्यभाषागतानां शब्दानामपि प्रयोगं कुर्वन्ति।

**4. सरला भाषा-**

लैण्डनमहोदयानामनुसारेण उत्तराणां भाषा सदैव सरला एव स्यात् । कदाचित् छात्राः स्वोत्तरे ज्ञानप्रदर्शनार्थमेवं प्रकारकाणां शब्दानां सूक्तीनां प्रयोगं कुर्वन्ति येषां तात्पर्यं न तु ते जानन्ति, न च अन्ये छात्राः एव जानन्ति। शिक्षकः तमवरोधयेत्। यतः अनेन छात्राणां न कोऽपि लाभः भवितुमर्हति ।

* आचार्यः विभागाध्यक्षश्च , शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि) मुम्बई परिसरः

**5. स्पष्टार्थः-**

उत्तरमेवं भवितव्यं यस्य कः अपि स्पष्टः अर्थः स्यात्। फलतः उत्तरमर्थपूर्णं स्यात् । एवं प्रकारकमुत्तरं तथ्यपूर्णं भवति । लैण्डनमहोदयानामनुसारेण- अर्थानां स्पष्टता उत्तराणामेवं प्रकारकं वैशिष्ट्यमस्ति यस्य कृते सर्वे यतन्ति । यतितव्यञ्च ।

**6. निश्चितविचारः-**

उत्तरेषु यः कोऽपि विचारः स्यात्, सः विचारः निश्चितः स्यात् । कदाचित् छात्राः एवमुत्तरं ददति यस्य विचारं निश्चितं न भवति । यथा - प्रश्नः भवति यत् ताजमहलस्य निर्माणं केन कृतम्, छात्राः उत्तरं प्रददति यत् - ताजमहलस्य निर्माणं केनचित् मुस्लिमशासकेन कृतं भवितुमर्हति। अथवा अस्य निर्माता शाहजहाँ भवितुमर्हति । एवं प्रकारकमुत्तरं दोषपूर्णं भवति । लैण्डनमहोदयानामनुसारेण- शिक्षकाः उत्तराणामनिश्चिततां दूरीकर्तुं प्रयासं कुर्युः ।

**7. पूर्णविचारः -**

भावात्मकदृष्ट्या उत्तराणि पूर्णानि भवितव्यानि । अतः अध्यापकाः अवधानं दद्युः येन छात्राः स्व-उत्तरेषु पूर्णभावानां प्रदर्शनं कुर्युः । अपूर्णभावयुक्तानामुत्तराणां संशोधनं छात्राणां साहाय्येन करणीयम्। असम्भवे सति अध्यापकेनैव करणीयम् ।

**8. पूर्ण वाक्यम्-**

छात्राणामुत्तराणि शिक्षकाः पूर्णेषु वाक्येष्वेव स्वीकुर्युः। अपूर्णमुत्तरं छात्राणां भावान् विचाराञ्च न स्पष्टयति ।

**9. प्रासङ्गिकता-**

छात्राः प्रश्नस्यानुगुणमेवोत्तरं प्रदद्युः । छात्राः स्पष्टरूपेण निर्दिष्टव्याः यत् ते प्रश्नेष्ववधानं प्रदाय एव उत्तरं प्रदद्युः । ते स्वकीयेषु उत्तरेषु अपृष्टं विचारं न योजयेयुः । अतः प्रश्नानां प्रसङ्गे एव छात्राणामुत्तराणि भवितव्यानि।

***10.* श्रवणीयम्-**

छात्राः प्रशनानामुत्तराणि एवं प्रदद्युः येन कक्षायां स्थिताः सर्वे छात्राः तेषामुत्तराणि श्रोतुं समर्थाः भवेयुः। यतोहि छात्राः यदि उत्तराणि न श्रोष्यन्ति तर्हि किं कथितवान् किं कथितवान् इति कृत्वा कोलाहलं करिष्यन्ति। फलतः कक्षायामनुशासनहीनताऽऽयाति ।

***11.* संक्षिप्तम्-**

गार्लिकमहोदयानुसारेणोत्तराणि संक्षिप्तानि भवितव्यानि। अनेन समयस्य भाषायाश्च सदुपयोगः भवति । एकस्य प्रश्नस्य उत्तरे अधिकाधिकं वक्तव्यम् अनुचितं भवति । अतः छात्राः प्रश्नस्य उत्तराणि संक्षिप्तरूपेणैव प्रदद्युः ।

**12. विचारपूर्णम्-**

उत्तराणि उत्तमानि तदैव भवन्ति यदा छात्राः उत्तराणां विषये सम्यग्रूपेण विचारयन्ति । अर्थात् विचारात्परं प्रदीयमानमुत्तरं छात्राणां मानसिकक्रियायाः फलं भवति । फलतः विचारपूर्णं भवति । एवं प्रकारकमुत्तरं काल्पनिकमनुमानाश्रितं वा न भवति।

**दोषपूर्णानि उत्तराणि**

**1. अनुमितमुत्तरम्-**

अनुमितानि उत्तराणि सदा दोषपूर्णानि भवन्ति। प्रत्येकस्यां कक्षायां एवं विधाः छात्राः भवन्ति ये प्रायः प्रश्नान् न श्रोष्यन्ति, उत्तराणि न चिन्तयिष्यन्ति परमनुमानेन उत्तराणि प्रददति । एवं प्रकारकाः छात्राः आशान्विताः भवन्ति यत् किञ्चन उत्तरं समुचितं भविष्यति एव । एवं प्रकारकेषु उत्तरेषु विवेकस्याभावः भवति । अतः शिक्षकाः छात्रान् अवरोधयन्तु । लैण्डनमहोदयस्याभिमतमस्ति यत्- ये अध्यापकाः एवं प्रकारकमुत्तरं प्रोत्साहन्ति, वस्तुतः ते छात्रेषु अनवधानस्याभ्यासमुत्पादयन्ति।

**2. अनवधानता-**

केचन छात्राः प्रश्नश्रवणानन्तरमेव साक्षात् चिन्तनं विनैव झटिति एव उत्तरं प्रयच्छन्ति। ते न चिन्तयन्ति यत् उत्तरे यत्किमपि ते कथयन्ति, किं तत् समीचीनमस्ति न वा । लैण्डनमहोदयाः कथयन्ति यत्- एवं प्रकारकमुत्तरं छात्राणां त्रुटिः नास्ति अपितु मूढ़त्वमस्ति। ते न क्षन्तव्याः तान् अनुत्साहयितव्यम्।

**3. काल्पनिकता-**

कक्षायां केचन छात्राः एवं भवन्ति ये अध्यापनशैल्या, प्रश्नकरणशैल्या एवावगच्छन्ति यत् प्रश्नमाध्यमेनाध्यापकः किमिच्छतीति। एवं विधाः छात्राः कदाचित् कक्षायां संकटपूर्णां स्थितीमुत्पादयन्ति। कदाचित् ते निष्कर्षपूर्णमुत्तरं प्रददति । एवं शिक्षणकार्यमवरुद्धं भवति । अध्यापकाः किंकर्तव्यविमूढ़ाः भवन्ति । अतः छात्राः विज्ञाप्याः यत् प्रश्नानामेवोत्तरं दद्युः। निस्कर्षकथनं समये एव भविष्यति । छात्राः स्वनिष्कर्षं स्थापयन्तु। भविष्येऽपि अस्यादेशस्य पालनम् अवश्यमेव कुर्युः ।

**4. हास्यप्रदमुत्तरम्-**

कदाचित् छात्राः ज्ञात्वा हास्यप्रदमुत्तरं मूर्खतापूर्णञ्चोत्तरं ददति। एवं विधाः छात्राः अक्षम्याः भवन्ति। अतएव दण्डनीयाः।

**5. सामूहिकमुत्तरम्-**

साहूमिकमुत्तरमुचितं न भवति। कक्षायां छात्राः वैयक्तिकरूपेण स्वार्जितज्ञानस्य प्रदर्शनं कुर्युः एतदर्थं छात्राः वैयक्तिकरूपेण प्रश्नानामुत्तरं प्रदद्युः । अतः छात्राणामेवम् अवसरः प्रदेयः । विषयेऽस्मिन्

रायवर्णमहोदयाः कथयन्ति यत्- सामूहिकस्योत्तरस्य आज्ञा न कदापि दातव्या। द्वित्राः अपि न आज्ञाप्याः सामूहिकोत्तरप्रदानार्थम्।

**6. प्रतिक्रियाहीनता-**

कक्षायामियमेका जटिला समस्या भवति यत् छात्राः उत्तरं न प्रयच्छन्ति । ते निष्क्रियाः भवन्ति । प्रतिक्रियाविहीनाः भवन्ति। यदि ददति अपि तर्हि आवशयकतानुसारं न प्रददति ।

**उत्तरनिष्कासनम्**

यथा प्रश्नकरणमेका कला अस्ति, तथैव उत्तरनिष्कासनमप्येका कला अस्ति । यतः कक्षायां प्रायः छात्राः उत्तरप्रदाने संकोचमाचरन्ति । सत्यपि उत्तरस्य ज्ञाने कक्ष्यायां सम्यग्रूपेण न कथयन्ति, दोषपूर्णं कथयन्ति। अतः अध्यापकाः यदि उत्तरनिष्कासनकौशले कुशालाः स्युः, तर्हि छात्राः प्रश्नानां समुचितमुत्तरं दास्यन्ति एव। कौशलेऽस्मिन् दक्षतासम्पादनार्थं निम्नलिखितेषु अंशेषु अवश्यमेवावधानं प्रदेयम्।

1. प्रश्नकरणात्परं साक्षादेव उत्तरस्य जिज्ञासा न करणीया। प्रायः अध्यापकाः प्रश्नं कुर्वन्ति, ततः परं क्षणात्मकमपि अवकाशं न दत्वा उत्तरं पृच्छन्ति। अनेन छात्राणां कृते उत्तरस्य चिन्तनार्थं समयः न लभ्यते। फलतः उत्तरं दोषपूर्णम्, अपूर्णम्, अनुचितं वा भवति। अतः प्रश्नकरणात् परं किञ्चिदपि समयः छात्रेभ्यः प्रदातव्यः।

2. अध्यापकाः उत्तरं प्रति धैर्यधारणं कुर्युः । छात्राः उत्तरप्रदानार्थं यदा समयं स्वीकुर्वन्ति तदा अध्यापकाः धैर्यहीनाः भवन्ति। ते स्वयमेव उत्तरं कथयन्ति। परं नेयं प्रक्रिया समुचिता। अध्यापकाः कदापि न विस्मरेयुः यत् छात्राः मानवाः भवन्ति। ते मानवशिशून् पाठयन्ति। येषु चिन्तन-विचार-तर्क-कल्पनादिशक्तयः सन्ति। ते विचिन्त्य उत्तरं दास्यन्ति। उत्तरे न प्राप्ते सति प्रश्नानां स्वरूपपरिवर्तनं कुर्युः, अपेक्षितोत्तरानुगुणं प्रश्नान् रचयेयुः।

3. अध्यापकानां व्यवहारः छात्रान् प्रति सहानुभूतिपूर्णः स्यात् । अध्यापकेषु केचन रुक्षाः भवन्ति, केचन कर्कशस्वभावाः। फलतः कक्षायां भयस्यातंकस्य च वातावरणं भवति। भीताः आतंकिताः च छात्राः जानन्तोऽपि उत्तरं न प्रददति। ते अध्यापकस्य आतंके भये वा सर्वं विस्मरन्ति। अतः कक्षायां सहानुभूतिपूर्णं वातावरणं स्यादित्येतदर्थं अध्यापकाः आचरेयुः । येन छात्राः अध्यापकान् मार्गदर्शकरूपेण स्वीकुर्युः । मैत्रीपूर्णव्यवहारे एव प्रचलितमध्यापनं सफलं भवति । जटिलानां प्रश्नानामुत्तरमपि छात्राः स्वाभाविकरूपेण प्रददति।

4. अध्यापकाः उत्तरप्रदानार्थं छात्रान् प्रोत्साहयेयुः । प्रत्येकस्यां कक्षायां केचन मन्दबुद्धयः, मध्यमानबुद्धयः, सामान्यबुद्धयः, प्रतिभाशालिनश्च छात्राः भवन्ति। अतः सर्वविधाः छात्राः कक्षायां प्रोत्साहितव्याः। येन ते मन्दाः अपि छात्राः उत्तरप्रदाने सक्षमाः भवेयुः। परमत्यधिकं प्रोत्साहनमपि

कक्षायां शिक्षणदृष्ट्या अनुचितं भवति। केचन अध्यापकाः शोभनम्, बहु सुन्दरम्, अतिसमीचीनम् इत्यादिकथने अभ्यस्ताः भवन्ति। परमिदमनुचितमस्ति। प्रोत्साहनमावश्यकतानुसारेणैव दातव्यम्।

5. लज्जावतां छात्राणां प्रोत्साहनम्- कक्षायां केचन छात्राः लज्जाशीलाः भवन्ति, अपि च केचन स्वभावेन संकुचिताः भवन्ति। ते लज्जावशात् संकोचवशाद् एव जानन्नपि उत्तरं न प्रददति। शिक्षकाः तान् प्रोत्साहयेयुः। तेषां लज्जां दूरीकुर्युः, तान् संकोचमुक्तान् कुर्युः । येन तेऽपि मन्दाः छात्राः प्रशनानामुत्तरं प्रदद्युः।

6.सर्वे छात्राः उत्तरप्रदानार्थं निर्देष्टव्याः । केचन अध्यापकाः केषाञ्चन छात्राणां नामानि स्मरन्ति । कक्षाध्यापनसमये ते प्रश्नमुक्त्वा सदा तेभ्यः एव उत्तरं पृच्छति । फलतः अन्ये छात्राः निष्क्रियाः भवन्ति। अतः ते अवशिष्टाः छात्राः उत्तरचिन्तनं न कुर्वन्ति । ते शिक्षणं प्रति स्वकीयमौदासीन्यं प्रदर्शयन्ति। यतः ते जानन्ति यत् अध्यापकः तान् उत्तरदानार्थं न कथयिष्यन्ति । अत एव प्रश्नमपि न शृण्वन्ति। सर्वे जानन्ति एव यत् शिक्षणे सहयोगी भावना अनिवार्या भवति। अतः अध्यापकाः सर्वेषां छात्राणां सहयोगं स्वीकुर्युः।

7.उत्तरे सहयोगः न दातव्यः- छात्राः स्वयमेव पूर्णमुत्तरं प्रदद्युः। अध्यापकाः उत्तरप्रदानार्थं न किमपि सहयोगं प्रदद्युः । कश्चन छात्रः  यदि उत्तरे कञ्चन शब्दमुक्त्वा विरमति तर्हि अध्यापकः तमुत्तरं न पूरयेत्। अनेन छात्राणां मानसिकविकासः अवरुद्धः भवति। यदि एकः छात्रः उत्तरं न कथयति तर्हि अन्ये छात्राः प्रष्टव्याः। यदि अधिकांशाः छात्राः उत्तरप्रदाने असमर्थाः स्युः तर्हि प्रशनः एव दोषपूर्णः इति ज्ञात्वा प्रश्नसंशोधनं करणीयम्।

8.उत्तराणामावृत्तिः न भवेत् । प्रायः दृश्यते यत् छात्राः यदुत्तरं ददति तस्योत्तरस्यावृत्तिमध्यापकः करोति, परं नायं विधिः समुचितः। अनेन समयनष्टः भवति। छात्राः कक्षायामनवधानाः भवन्ति। ते सावधानेन अन्येषामुत्तरं न श्रोष्यन्ति। यतः ते जानन्ति यत् उत्तराणामावृत्तिः तु अध्यापकेन भविष्यति एव। फलतः कक्षायां छात्राः अनवधानाः भवन्ति।

9.निर्दिष्टः एव छात्रः उत्तरं प्रदद्यात्। अध्यापकाः छात्रेषु एवमभ्यासनिर्माणं कुर्युः येन ते अनुमतिं विना उत्तरं न प्रदद्युः । अतः प्रश्नकरणात्परं क्षणात्मकमवसरं प्रदाय छात्राः प्रष्टव्याः यत् के के उत्तरं दातुमिच्छन्ति? अथवा उत्तरं कः दास्यति ? स्वहस्तमुत्थापयत । पुनः उत्थापितेषु हस्तेषु कश्चन निर्देष्टव्यः यत् - त्वं कथय । तदा सः एव निर्दिष्टः छात्रः उत्तरं प्रदद्यात् । स्वेच्छया, अनाज्ञया उत्तरकथनेन कक्षायां छात्रेषु च अनुशासनहीनता आगच्छति।

10. ऑष्टिनमहोदयस्यानुसारेण शिक्षकाः अशुद्धमुत्तरं न स्वीकुर्युः। परं केवलं भवतामुत्तरमशुद्धमस्ति इति न कथनीयम्। अपितु भवतामुत्तरं किमर्थमशुद्धमस्ति इत्यपि कथनीयम्। अनेन छात्राः कुण्ठिताः न भवन्ति। अतः उत्तरं कुत्र किमर्थं वा अशुद्धमस्ति इत्यपि विज्ञाप्य तिरस्ककरणीयम्।

11.अशुद्धोत्तराणां कारणमपि विज्ञापनीयम् । छात्रप्रदत्त-अशुद्धोत्तरस्य अशुद्धतायाः कारणान्यपि सूचनीयानि । अनेन छात्राणां मनसि सन्देहो नागच्छति। ते स्वकीयं त्रुटिमवगच्छन्ति । रायवर्णमहोदयानां कथनमस्ति यत्- यदि उत्तरं निश्चतरूपेण अशुद्धमस्ति तर्हि अध्यापकाः तेषां कारणानां व्याख्यामपि कुर्युः, येन कारणेन उत्तरम् अशुद्धमस्ति । यावत् शिक्षकः नैपुण्येनेदं न स्पष्टीकरोति यदुत्तरे किमशुद्धमस्ति, तावत् छात्राः सम्यग्रूपेण विषयं नाधिगच्छन्ति।

12.अशुद्धोत्तराणां विश्लेषणम् । यदि कश्चन छात्रः प्रश्नानां शुद्धमुत्तरं न ददाति तर्हि अध्यापकः अशुद्धोत्तराणां विश्लेषणं कृत्वा तेषां संशोधनं कुर्यात् । अनेन स्वयमेव छात्राः स्वत्रुटीमवगच्छन्ति ।

13.यः छात्रः अशुद्धमुत्तरं प्रददाति, तैः शुद्धोत्तराणामावृत्तिः कारयितव्या, अर्थात् छात्राणाम् अशुद्धोत्तरमस्वीकृत्य अन्ये छात्राः प्रष्टव्याः। शुद्धोत्तरं सम्प्राप्य अशुद्धोत्तरप्रदातृभ्यः छात्रेभ्यः पुनः प्राप्तशुद्धोत्तराणामावृत्तिः कारयितव्याः। अनेन त्रुटीनां ज्ञानं भवति ।

14.आंशिकरूपेण शुद्धोत्तराणामुपेक्षा न करणीया । यदि कश्चन छात्रः आंशिकं शुद्धमुत्तरं ददाति तर्हि तदुत्तरं नोपेक्षणीयम् । अध्यापकः प्रयासं कुर्यात्, येन सः पूर्णं शुद्धमुत्तरं प्रदद्यात् । विषयेऽस्मिन् केनेडी महोदयाः कथयन्ति यत्- यदा एवं विधानि उत्तराणि प्रदीयन्ते येषां कश्चन भागः एव शुद्धं भवति तर्हि अशुद्धभागस्य उपेक्षां विधाय शुद्धभागस्योपयोगः करणीयः।

15.समुचितानामुत्तराणां प्रशासा करणीया । अध्यापकः तेषां छात्राणां प्रशंसां कुर्यात् ये समुचितमुत्तरं प्रददति । प्रशंसा समीचीनम्, शोभनम्, संकेतेन वा करणीया । प्रशंसया छात्रः प्रोत्साहितः भवति । विषयेऽस्मिन् ऑष्टिन्महोदयाः कथयन्ति यत् प्रयासस्य कृते साफल्यस्य कृते च प्रशंसा करणीया । अन्यथा प्रयासमनुसाफल्येन बहुप्रयासाः नष्टाः भवन्ति ।

16.अशुद्धोत्तरस्य कृते छात्राः न तिरस्करणीयाः । यदि कश्चन छात्रः अशुद्धमुत्तरं कथयति तर्हि तस्य छात्रस्य तिरस्कारः न करणीयः न च सः छात्रः दण्डनीयः । तस्योपहासोऽपि न कर्त्तव्यः । असाफल्यं स्वयमेव हि एकः दण्डः भवति । अतः अतिरिक्तदण्डप्रदानेन छात्रेषु हीनभावनायाः उत्पत्तिः भवति । ऑष्टिनमहोदयानामनुसारेणापि अशुद्धोत्तरप्रदाता छात्रः नोपेक्षितः, केवलमुत्तरमेव उपेक्षितं भवति ।

17.सामूहिकमुत्तरं न स्वीकरणीयम् । छात्रेभ्यः सामूहिकोत्तरप्रदानार्थमाज्ञा कदापि न दातव्या । सामूहिकोत्तरप्रदानेन कक्षाः बाधिताः भवन्ति । कक्षायामनुशासनहीनतामागच्छति । के उत्तरं ददति, के च उत्तरं न ददति इति सम्यक् न प्रतीयते ।

18.विचारविहीनमुत्तरं न स्वीकरणीयम् । केचन छात्राः चिन्तनं विनैव किमपि उत्तरं प्रदति । यतः ते चिन्तयन्ति यत् उत्तरं तु दातव्यमेव अस्ति । केचन छात्राः मनोरञ्जनदृष्ट्या अपि हास्यास्पदमुत्तरं प्रददति। उभयविधमुत्तरमवरोधनीयं कक्षारम्भादेव । अन्यथा छात्राः उच्छृङ्खलाः विवेकहीनाश्च भविष्यन्ति ।

19.शुद्धाशुद्धोत्तरयोर्मध्ये अन्तरस्पष्टीकरणम् । कदाचिदेकस्यैव प्रश्नस्य अनेकान्युत्तराणि प्राप्यन्ते । एतेषु उत्तरेषु कानिचन शुद्धानि अशुद्धानि च भवन्ति । सन्दर्भेऽस्मिन् ऑष्टिनमहोदयानामभिमतमस्ति यत् उत्तराणां तुलना कर्त्तव्या, पुनश्च स्पष्टरूपेण उत्तराणां शुद्धाशुद्धत्वं विज्ञापनीयम् ।

**उत्तराणां शुद्धीकरणम्**

1. ये छात्राः अशुद्धमुत्तरं प्रददति ते शुद्धोत्तरश्रवणानन्तरं शुद्धोत्तराणाम् आवृत्तिं कुर्युः ।
2. भाषाजन्याः, व्याकरणजन्याश्चाशुद्धयः छात्रैः हर्तव्याः।
3. आंशिकाशुद्धोत्तराणि स्वीकृत्य छात्रैः संशोधनीयम् ।
4. पूर्णतः अशुद्धोत्तराणामशुद्धतायाः कारणं विज्ञाप्य अस्वीकृत्य च अन्यछात्रेभ्यः प्रश्नं पृच्छेत् ।
5. यदि कक्षायाः कश्चन्नपि छात्रः उत्तरं न प्रददाति तर्हि प्रश्नस्य भाषा-शैली-शब्दाश्च परिवर्तनीयाः ।
6. कदाचित् किञ्चन उत्तरं कक्षायै प्रदाय कक्षायाः अभिमतमवगम्य तेषां संशोधनं करणीयम् ।
7. यदि कश्चन छात्रः स्वकीयस्य अन्येषां वा छात्राणामुत्तरं कथमशुद्धमस्तीति ज्ञातुमिच्छन्ति तर्हि अध्यापकाः स्पष्टरूपेण तेषां सन्देहनिवारणं कुर्युः ।
8. यदि अध्यापकः आशान्वितः अस्ति यत् अशुद्धोत्तरदाता छात्रः शुद्धोत्तरदातुमर्हति तर्हि सः प्रयासं कुर्यात् । परं कर्मण्यस्मिन् अधिकः समयः न यापनीयः ।
9. यदा कदा भाषा-व्याकरण-तथ्यात्मकदृष्ट्या अशुद्धमत्तरं श्यामफलके लिखित्वा छात्रैः संशोधनं कारयित्वा शुद्धं रूपं लेखनीयम् ।
10. यदि छात्राणामुत्तरम् अधिकमशुद्धमस्ति तर्हि तेषामशुद्धतायाः कारणं विज्ञापनीयम् । परं कारणमन्वेषणात्पूर्वं प्रश्नानां शुद्धता परीक्षणीया ।
11. अध्यापकाः प्रत्येकम् अशुद्धोत्तराणां विस्तृता व्याख्या न कुर्युः ।

**अनुशीलितग्रन्थाः**


*1. रामशकलपाण्डेय. सफलशिक्षणकला।*

*2. रघुनाथ सफाया, अधिगम का मनोविज्ञान।*

*3. के पी पाण्डेय, संस्कृतशिक्षण ।*

*4. भाई योगेन्द्रजीत, हिन्दी शिक्षण ।*

षष्ठोऽङ्कः, 2018-19

ISSN 2395-7921

# शिक्षारश्मिः

समीक्षिता मूल्याङ्किता च वार्षिकशोधपत्रिका

A Peer Reviewed Refereed Annual Research Journal

प्रधानसम्पादकः

प्रो. सुदेशकुमारशर्म्मा

सम्पादकः

डा. देवदत्तसरोदे

शिक्षाशास्त्रविभागः

राष्ट्रियसंस्कृतसंस्थानम्

(मानितविश्वविद्यालयः)

क.जे. सोमैयासंस्कृतविद्यापीठम्

विद्याविहारः, मुम्बई - 77



प्रो. सुदेशशर्मा
प्राचार्यः



डा. देवदत्तसरोदे
विभागाध्यक्षः



डा. वि.एस्.वि. भास्कररेड्डी



डा. कुमारः



डा. विनोदकुमारशर्मा



डा. सचिनकुमारः



डा. मनीषकुमारचाण्डकः



डा. जितेन्द्रकुमाररायगुरुः

Peer Reviewed Refereed Journal

ISSN : 2395-7921

# शिक्षारश्मिः

## शिक्षाशास्त्रविभागीयवार्षिकशोधपत्रिका

Annual Research Journal of Department of Education

(समीक्षिता मूल्याङ्किता च शोधपत्रिका)

**2018 - 19**

ख्यातं राष्ट्रियसंस्कृतं सुमहितं संस्थानमद्याखिलं
वाणीवैभवमातनोति नितरां राष्ट्रे चतुर्दिग्भवम्।
तत्रासौ निजगौरवेण महता सारस्वतं भासयन्
सोमय्याभुवि भासते परिसरो विद्याविहारे स्थितः॥

संरक्षकः
आचार्यः परमेश्वरनारायणशास्त्री
कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम् (मा. वि.) नवदेहली

प्रधानसम्पादकः
आचार्यः सुदेशकुमारशर्म्मा
प्राचार्यः, क. जे. सोमैयासंस्कृतविद्यापीठम्, मुम्बई

सम्पादकः
डॉ. देवदत्तसरोदे

राष्ट्रियसंस्कृतसंस्थानम्
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्
(मानितविश्वविद्यालयः)
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः (पूर्वम्) मुम्बई - 400077

| | | |
|---|---|---|
| पत्रिकानाम | : | शिक्षारश्मिः (शिक्षाशास्त्रविभागीयवार्षिकशोधपत्रिका) |
| प्रकाशकः | : | शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतसंस्थानम् ( मा. वि.), मुम्बई - 77 |
| © प्रतिलिप्यधिकारः | : | प्रकाशकाधीनः |
| ISSN | : | 2395-7921 |
| संरक्षकः | : | आचार्यः परमेश्वरनारायणशास्त्री, कुलपतिः |
| प्रधानसम्पादकः | : | आचार्यः सुदेशकुमारशर्मा, प्राचार्यः |
| सम्पादकः | : | डॉ. देवदत्तसरोदे, विभागाध्यक्षः |
| सम्पादकमण्डलम् | : | डॉ. वि. एस्. वि. भास्कररेड्डि<br>डॉ. कुमारः<br>डॉ. विनोदकुमारशर्मा<br>डॉ. सचिनकुमारः<br>डॉ. मनिष चाण्डकः<br>डॉ. जितेन्द्रकुमाररायगुरुः |


## मूल्याङ्कनकर्तृमण्डलम्

- **प्रो. प्रकाशचन्द्रः**
  प्राचार्यचरः, क.जे. सोमैयासंस्कृतविद्यापीठम्, मुम्बई
- **प्रो. सुदेशकुमारशर्म्मा**
  प्राचार्यः, क.जे. सोमैयासंस्कृतविद्यापीठम्, मुम्बई
- **प्रो. बोधकुमारझा**
  विभागाध्यक्षः, व्याकरणविभागः,
  क.जे. सोमैयासंस्कृतविद्यापीठम्, मुम्बई
- **डॉ. मुरलीकृष्णः**
  सहायकाचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

## पुनर्वीक्षकमण्डलम्

- **प्रो. एन. एन. जोशी**
  आचार्यचरः, क.जे. सोमैयाकलावाणिज्यमहाविद्यालयः, मुम्बई
- **प्रो. लोकमान्यमिश्रः**
  विभागाध्यक्षः, शिक्षाविभागः, राष्ट्रियसंस्कृतसंस्थानम् (मा.वि)
  लखनऊपरिसरः, लखनऊ
- **प्रो. प्रह्लादजोशी**
  विभागाध्यक्षः, शिक्षाविभागः, आर्. एस्.वि.पि., तिरुपतिः
- **प्रो. जयकृष्णन्**
  आचार्यः, शिक्षाविभागः,
  श्रीलालबहादुरशास्त्रीसंस्कृतविद्यापीठम्, नवदेहली


| | | |
|---|---|---|
| प्रकाशनवर्षम् | : | 2019 |
| अनुकृतयः | : | 200 |
| मुखचित्रविन्यासः | : | डॉ. जितेन्द्रकुमाररायगुरुः |
| अवधातव्यम् | : | शोधपत्रिकायाममुष्यां प्रकाशितशोधपत्राणां मौलिकत्वस्य तत्र प्रतिपादित-विचारस्य च कृते समग्रमुत्तरदायित्वं शोधपत्रलेखकानामेव भविष्यति, न वा सम्पादकस्य न च प्रकाशकस्य भविष्यतीति विज्ञाप्यते। |
| मुद्रणम् | : | RANK PRINTERS, MULUND (W), MUMBAI |

प्रो. पी.एन्. शास्त्री
कुलपति
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
('ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं
प्रत्यायन परिषद् द्वारा मान्यता प्राप्त)

Prof. P.N. Shastry
Vice-Chancellor
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)

RSKS/VC-101/2019-20/06
Dated- 15/04/2019

## मङ्गलशंसनम्

**आ नो भद्राः क्रतवो यन्तु विश्वतः।** ऋग्वेदः

सर्वाभ्यः आशाभ्यः ज्ञानविचाराः आयान्तु इति वेदवचनं ब्रूते। ब्रह्मणः अपररूपं भवति ज्ञानं तथा च उपनिषद्वचनं **सत्यं ज्ञानम् अनन्तं ब्रह्म** इति। वेदो हि नाम ज्ञानं यतो हि वेदपदस्य विद - ज्ञाने अस्माद् धातोः निष्पन्नत्वात् अस्यैव अपरनामधेयं ब्रह्म इति। वेदविविदिषया, ब्रह्मजिज्ञासया च यद्व्रतम् आचर्यते तद् ब्रह्मचर्यम्। ब्रह्मचारी ब्रह्मणि चरति वेदे परमात्मनि वा रमते ऐहिकामुष्मिकफलञ्चाधिगच्छति।

मानवजीवनस्य परमलक्ष्यम् अनया वेदविद्यया एव सम्पाद्यते इति हेतोः संस्कृतशास्त्रेषु विद्यमानानां नानाविद्यानां संरक्षणसंवर्धननिमित्तमध्ययनाध्यापनानुसन्धानप्रकाशनादिनानाक्रियाकलापैः लोकमुपकुर्वद् विलसति राष्ट्रियसंस्कृतसंस्थानम्। संस्थानपरिसरेष्वन्यतमपरिसरः मुम्बईमहानगरे विद्यते। परिसरस्थशिक्षाशास्त्रविभागेन **शिक्षारश्मिः** इति विदुषां शोधलेखैः सुभूषिता शोधपत्रिका प्रकाश्यते इति विज्ञाय परमसन्तोषमनुभवामि।

एतस्मिन् कर्मणि संलग्नाः तत्रत्याः प्राचार्याः, प्राध्यापकाः अन्ये कर्मचारिणश्च सर्वमङ्गलमवाप्नुयुः, विभागोऽयं दिने दिने समेधतां, शोधपत्रिका च लोके ज्ञानरश्मीन् विकिरतु इति मङ्गलकामना।

रामनवमी विक्रमसंवत् २०७६
दिल्ली

प्.ना.शास्त्री
प्रो. परमेश्वरनारायणशास्त्री
कुलपतिः

56-57, Institutional Area, Janakpuri, New Delhi-110058 Ph.: (O) 28523949 (Fax) 28521948
EPABX : 28524993, 28521994, 28524995 E.Mail : rskspvc@yahoo.com

Prof. Ch. L.N. Sarma
Professor & Dean
Faculty of Education
Rashtriya Sanskrit Sansthan (DU)
Accredited with 'A' grade by NAAC
Janakpuri, New Delhi - 110 058
PRINCIPAL
RSKS (DU) Guruvayur Campus
Puranattukara, Thrissur District,
Kerala - 680 551

आचार्यः चल्ला लक्ष्मीनारायणशर्मा
आचार्यः सङ्कायप्रमुखश्च
शिक्षासङ्कायः
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.वि)
राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'ए' श्रेण्यां प्रत्यायितम्
जनकपुरी, नवदेहली- 110 058
प्राचार्यः, रा.सं.सं.(मा.वि.वि.) गुरुवायूर् परिसरः
पुरनाट्टुकरा, त्रिशूर,केरला - 680551

दिनाङ्कः /Date:..12..04...2019...

## शुभं भूयात्

राष्ट्रियसंस्कृतसंस्थानस्य, क. जे. सोमैयासंस्कृतविद्यापीठस्य मुम्बईपरिसरस्य शिक्षाशास्त्र - विभागीया वार्षिकी पत्रिका शिक्षारश्मिरिति प्रतिवर्षमिव ऐषमोऽपि प्रकाश्यत इति विदित्वा मोमुदीति चेतः। अद्यत्वे उत्तमानां लेखानां सम्पादनं प्रकाशनञ्च नातिसुकरं कर्मेति लोकविदितमेव। तथापि कर्मठाः पत्रिकाया अस्याः संयोजकास्सम्पादकाश्च डा. देवदत्त सरोदे महाशयाः श्रद्धया कार्यमिदं निर्वहन्तीति प्रशंसनीयमेव।

महतोऽस्य कृत्यस्य कारणभूताः प्राचार्याः, निमित्तभूताः शिक्षाशास्त्रिणश्छात्राः, सहकारकाः अध्यापकाश्च हृदयेन अभिनन्द्यन्ते। शिक्षारश्मिरियम् आचन्द्रतारार्कं प्रसरतादिति कामयमानः ........

भावत्कः

आचार्यः चल्ला. लक्ष्मीनारायणशर्मा

शिक्षासङ्कायप्रमुखः, राष्ट्रियसंस्कृतसंस्थानम्

आचार्यः ए. पि. सच्चिदानन्दः
प्राचार्यः (प्र)
राष्ट्रियसंस्कृतसंस्थानम्,
(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी - 577 139

Prof. A. P. Sachidananda
Principal (I/C)
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University under MHRD Govt. of India)
Rajiv Gandhi Campus, Sringeri - 577 139

# शुभाशंसनम्

## जनयतु हर्षं शिक्षारश्मिः

राष्ट्रियसंस्कृतसंस्थानस्य **"योऽनूचानः स नो महान्"** इति ध्येयवाक्यम् । तदनुसृत्य राष्ट्रियसंस्कृतसंस्थानेन प्राचीनशिक्षातत्त्वानां पुनरध्ययनाय प्रचाराय च शिक्षाशास्त्रस्य पाठ्यक्रमः समारब्धः । **"फलानुमेयाः प्रारम्भाः"** इति न्यायानुसारं राष्ट्रियसंस्कृतसंस्थानं समस्तविश्वे संस्कृतशिक्षां विस्तारयामास । तथैव साम्प्रतमपि राष्ट्रियसंस्कृतसंस्थानस्य विविधेषु परिसरेषु शिक्षाशास्त्रपाठ्यक्रमः सञ्चाल्यते । तेषु क.जे.सोमय्यासंस्कृतविद्यापीठम् अपि अन्यतमम् । अत्र महत्या श्रद्धया शिक्षाशास्त्रविषयपाठनेन सह पाठ्येतरकार्याण्यपि प्रवर्तन्ते । तत्र शिक्षाविभागीयैः प्राध्यापकैः छात्रैश्च मिलित्वा बहुभाषाभूयिष्ठेयं **शिक्षारश्मि**नाम्नी शिक्षाशास्त्रविभागीया वार्षिकी पत्रिका मनोज्ञया शैल्या सम्पादिता अस्तीति विज्ञाय मोमुदीति नश्चेतः ।

एतस्मिन् पत्रिकासम्पादनकर्मणि सततं परिश्रमं कृतवद्भ्यः डा. देवदत्त सरोडे प्रभृतिभ्यः विभागीयप्राध्यापकेभ्यः, मार्गदर्शनं दत्तवद्भ्यः प्राचार्येभ्यः, सहकृतवद्भ्यो, छात्रेभ्यश्च मङ्गलं कामये ।

सर्वान्ते सन्दर्भेऽस्मिन् शरदिन्दुसन्निभायाः शारदाम्बायाः, सुधांशुकलितोत्तमाङ्गस्य चन्द्रमौलीश्वरस्य, श्रीमज्जगद्गुरूणां श्रीश्रीभारतीतीर्थमहास्वामिनां तत्करकमलसञ्जातानां श्रीश्रीविधुशेखरभारतीमहास्वामिनाञ्च चरणकमलेषु प्रणतिततीः समर्पयामि ।

विलम्बफाल्गुणतृतीयाशनिवासरः

२३-०३-२०१९

विद्वज्जनविधेयः

ए.पी.सच्चिदानन्दः

प्रो. ए.पि.सच्चिदानन्दः

प्राचार्यः (प्र)

प्रो. एस. के. शर्मा
प्राचार्य
राष्ट्रिय संस्कृत संस्थान
(मानित विश्वविद्यालय)
(मानव संसाधन विकास मन्त्रालय, भारत सरकार के अधीन)
क. जे. सोमैया संस्कृत विद्यापीठ,
विद्याविहार ( पू. ) मुम्बई

Prof. S. K. Sharma
Principal
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University)
Under Ministry of H. R. D. Govt. of India
K. J. Somaiya Sanskrit Vidyapeetha,
Vidyavihar (E), Mumbai

दिनाङ्कः १५/०४/२०१९

# स्वस्तिवचनम्

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥** - मनुः

भारतवर्षेऽस्मिन् पुण्यभूमौ विद्याविद्योतितानां प्रज्ञापुरुषाणां सविधे निखिलेऽस्मिन् जगति विद्यमानान् मानवान् सद्धर्मीन वर्तितुं सद्वृत्तं समधिगन्तुम् निर्दिशति महर्षिमनुः । तदेतच्चरित्रं ज्ञानं विना व्रतमन्तरेण च सर्वथा दुःशकम्, अतो ज्ञानं समासाद्य तपसा सदाचारे वर्तनमपेक्षितम् । अनेन सुतरामेतत्स्पष्टं भवति पुरा भारते ज्ञानं शीलं च कियन्महनीयं स्थानं भजतः इति । साम्प्रतमपि नैतदसाम्प्रतमिति प्रत्येमि । भारते ज्ञानविज्ञानपरम्परा वेदेषु विद्याऽविद्या इति, उपनिषत्सु पराऽपरा चेति प्रथिता । तां परम्परामजस्रं निर्वहद् **योऽनूचानः स नो महान्** इति वचनं सार्थकीकुर्वद् राजते लोके राष्ट्रियसंस्कृतसंस्थानम् । अस्यैवान्यतमपरिसरः मुम्बई इत्याख्यायां महानगर्यां विलसति । अत्र विद्यमानेन शिक्षाशास्त्रविभागेन प्रतिवर्षमिवाऽस्मिन् वर्षेऽपि **शिक्षारश्मिः** इति विभागीया शोधपत्रिका प्रकाश्यते इति महतः प्रमोदस्य विषयः । ज्ञानस्य ज्योतिः सदा दीप्येत तदर्थं शिक्षणानुसन्धानप्रकाशनादिकर्म अनिशं प्रवर्ततामिति कामये । एतस्मिन् श्रमसाध्ये कर्मणि आत्मनः व्यापारितवतां सुधियां प्राध्यापकानां शिवः शिवमातनोतु इति मङ्गलकामनाः ।

प्रो. सुदेशकुमारशर्मा
प्राचार्यः

रामनवमी, विक्रमसंवत् २०७६
मुम्बई

Suruchi Kala Bhavan, 1st Floor, Somaiya Vidyavihar, Vidyavihar (E), Mumbai – 400077
Ph.: 022-21025482, Mob. : +919549160005, Email- rsksmumbai@yahoo.com, skjpr15@yahoo.com



# सम्पादकीयम्

**अच्छिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य ददितारः स्याम।**
**सा प्रथमा संस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः।।** यजुर्वेद 7.14

**'सा प्रथमा संस्कृतिर्विश्ववारा'** इति अध्वर्युवेदस्य आर्षोक्तरीत्या भारतीया संस्कृतिः विश्वजनैः वरणीया सेवनीया च विद्यते। सेयं भारतीया संस्कृतिः विश्वजनीना परममहनीया पुराकालात् परमश्रद्धास्थानं बिभ्राणा विलसति। एतस्याः संस्कृतेः आधारभूता संस्कृतभाषा विद्यते। सैषा संस्कृतभाषा भारतस्य प्रतिष्ठाऽपि अस्ति। तथा चोक्तम् -**'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा '।**

विश्वस्मिन् विश्वेऽनिशं संस्कृतस्य संस्कृतशास्त्राणाञ्च ज्ञानं विज्ञानञ्च विकचीकर्तुं **राष्ट्रियसंस्कृतसंस्थानं** संस्कृतजगति उदयाचलारूढो भानुरिव भृशं भ्राजते । अस्यैव द्वादशसु परिसरेष्वन्यतमः परिसरः मुम्बानगर्यां **राष्ट्रियसंस्कृतसंस्थानम्, क.जे. सोमैया संस्कृतविद्यापीठमि**त्याख्यया प्रथितयशस्कोऽयं वेविद्यते । अत्र साहित्यम्, व्याकरणम्, ज्योतिषम्, शिक्षाशास्त्रम्, मुक्तस्वाध्यायकेन्द्रमिति विभागपञ्चकं विलसति । इह शिक्षाशास्त्रविभागे वर्षद्वयस्य शिक्षाशास्त्रिपाठ्यक्रमे ९७ छात्राः अधीयानाः सन्ति। संस्कृतशिक्षणं शास्त्रशिक्षणं कथं विधेयम्? एतदर्थं शिक्षाशास्त्रविभागः प्राचीनाधुनिकरीतिं समासाद्य शिक्षणम्, अनुसन्धानं , प्रकाशनम् इत्येतत् कार्यत्रयम् अनुतिष्ठति। तत्र प्रकाशनकार्ये **शिक्षारश्मिः** इति वार्षिकी शोधपत्रिका आङ्ग्लहिन्दीसंस्कृतमिति तिसृभिः भाषाभिः भूषिता शिक्षाशास्त्रज्ञानसुषमामाविष्कुर्वती विलसति इति विदितचरमेव प्रेक्षावतां शेमुषीजुषाम्।

शिक्षाशास्त्रमित्युच्यमाने तत्र का नु खलु शिक्षेति स्वाभाविकी जिज्ञासा जागर्त्येव। प्रकृतप्रसङ्गे शिक्षा नाम मानवस्य सर्वाङ्गीणविकासः इति आमनन्ति शिक्षाविपश्चिद्वराः । शीलनिर्माणमेव शिक्षा इति अपरे शिक्षाविदः, उत्तमव्यक्तित्वनिर्माणमेव शिक्षा इति केचित्। उत्तमव्यक्तित्वस्य मूलं कारणं भवति तदीयजनस्य शीलम्। अत एव **सर्वेषामपि *सर्वकारणमिदं शीलं परं भूषणम्'*** इति शीलं परमभूषणत्वेन परिकीर्तितं भर्तृहरिणा नीतिशतके । शिक्षामुखेन शीलं, व्यक्तित्वञ्च संवर्धयितुं शिक्षणकर्मणि मनोवैज्ञानिकप्राविधिकतत्त्वानाम् आलम्बनं नितान्तमपेक्षितम्, अतः सर्वमेतत् मनसि निधाय अमुमेव विषयं केन्द्रीकृत्य देशस्य दिग्दिगन्तरालेषु निवसतां शिक्षाशास्त्रनदीष्णानां संस्कृतशास्त्रसारस्वतसमाराधनतत्पराणां विदुषां नैके शोधलेखाः समधिगताःसन्ति। एतान् सर्वान् महता प्रयत्नेन सुचारुतया सम्पाद्य प्रज्ञाप्रसूतैर्लेखनैर्गुणवतीयं **शिक्षारश्मि**रित्याख्या शोधपत्रिका प्रतिवत्सरमिव अस्मिन् हायनेऽपि प्राकाश्यन्नीयते इति अमन्दमानन्दमनुभवामो वयम् । अत्र विद्यमानं शिक्षाशास्त्रविषयवैविध्यं, भाषावैविध्यं च नूनम् अभिज्ञशास्त्राधिजिगासूनां मनांसि प्रसह्य आवर्जयति इत्यत्र नास्त्यल्पीयान् अपि आरेकः । पत्रिकायामस्यां नैकशास्त्रकोविदैः आचार्यैः, शिक्षाशास्त्रिभिः, शोधच्छात्रैः, छात्राध्यापकैः प्रयत्नेन लिखिताः शिक्षासम्बद्धाः लेखाः प्रकाश्यमानाः सन्ति । प्रयत्नोऽयं कियत्साफल्यमञ्चतीति अधरोत्तरं व्यक्तीकर्तुं विद्वद्धौरेया एव प्रमाणम् ।

राष्ट्रियसंस्कृतसंस्थानम् इति मानितविश्वविद्यालयस्य वदान्यैः कुलपतिवर्यैः मान्यैः **परमेश्वरनारायणशास्त्रिभिः** प्रदत्ताशीर्वचनैः, अन्यैः आचार्यैः रातैः शुभाशंसवचोभिः अभिप्रेरणाभिः प्रचोदिताः वयं हर्षातिरेकमनुभवामः ।

परिसरस्य प्राचार्याः **सुदेशकुमारशर्ममहोदयाः**, काले काले समुपदिशन्तः, सहायं कुर्वाणाः जटिलमेतत्कार्यं सरलमकार्षुः। विभागीयाध्यापकाः, छात्राः, कर्मचारिणश्च महता प्रयत्नेन पत्रिकासम्पादनप्रकाशननियोगमिमं द्राक् पूर्णतामनैषुः , अतः समेभ्यः कार्तज्ञ्यवचांसि वितीर्य विरम्यते विस्तरात् ।

**डा.देवदत्तसरोदे**

# शिक्षाशास्त्रविभागीयगतिविधयः 2018-19

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयः 1970 तमे वर्षे अक्टोबरमासस्य 15 दिनाङ्के राष्ट्रियसंस्कृतसंस्थानं संस्कृतभाषायाः प्रचारप्रसाराय प्राचीनशास्त्राणां संरक्षणाय च समुदघाटयत् । क्रमशः विकसदिदं संस्थानं २००२ तमे वर्षे मानितविश्वविद्यालयत्वेन पुरोगतिं प्राप्नोत् । लोके संस्कृतस्य बोधनस्यावश्यकतां जानन्निदं संस्थानं संस्कृतभाषाशिक्षकाणां निर्माणार्थं शिक्षकप्रशिक्षणाय शिक्षाशास्त्रविभागं १९८३ तमे वर्षे समुपास्थापयत् । अधुना विभिन्नराज्येषु स्वकीयपरिसराः संस्थानस्यास्य समुल्लसिता वर्तन्ते । विद्यमानेषु तेषु द्वादशपरिसरेषु क. जे. सोमैयासंस्कृतविद्यापीठमिदं मुम्बईनगरे राराष्टि । परिसरेऽस्मिन् व्याकरण-साहित्य-ज्योतिषविभागैः साकं शिक्षाशास्त्रविभागोऽपि राराज्यते । २००६ तमे वर्षे महाराष्ट्रराज्ये संस्कृतशिक्षकप्रशिक्षणार्थं शिक्षाशास्त्रविभागोऽयं समारभ्यत । परिसरस्यास्य प्रथमप्राचार्याः भवन्ति प्रो. प्रकाशचन्द्रमहोदयाः । प्रथमशिक्षाशास्त्रविभागाध्यक्षाः भवन्ति प्रो. लोकमान्य मिश्र महोदयाः । अधुना विभागोऽयं प्राचार्याणाम् आचार्याणाम् सुदेशकुमारशर्म-महोदयानां मार्ग-दर्शने, डॉ. देवदत्तसरोदेमहोदयानाम् आध्यक्ष्ये भारते एव सर्वोत्कृष्टशिक्षा-विभागेषु अन्य-तमत्वेन विराजते । परिसरममुं विभिन्नेभ्यः प्रान्तेभ्यः आभारतात् शिक्षाशास्त्रम् अध्येतुं छात्राः समायान्ति ।

विभागस्य मुख्यभूमिका तावती उत्तमोत्तमाध्यापकानां निर्मितिः । एवञ्च छात्राध्यापकेषु शिक्षणकौशलानि प्राशासनिकक्षमता, संस्कृतसम्भाषणदक्षता, प्रायोगिक – व्यावहारिक – प्राविधिक – मनोवैज्ञानिक - विज्ञानज्ञानानुप्रयोगक्षमता इत्यादीनां सम्पादनं विभागस्य प्रमुखं लक्ष्यं विद्यते । तल्लक्ष्यप्राप्त्यर्थं श्रेष्ठाध्यापकानां समवायोऽत्र सदा प्रयतते ।

**वर्तमानशिक्षाशास्त्रविभागीयाध्यापकाः -**

**गतषड्वर्षेषु छात्राणां परिणामादिविवरणम्** -

| क्र. सं | अध्यापकस्य नाम | पदम् | सेवायाः कालावधिः |
|---|---|---|---|
| 01 | डॉ. देवदत्तसरोदे | विभागाध्यक्षः, वरिष्ठसहायकाचार्यश्च | 2006 तः अद्यावधि |
| 02 | डॉ.वि.एस्.वि. भास्कररेड्डि | वरिष्ठसहायकाचार्यः | 2006 तः अद्यावधि |
| 03 | डॉ. कुमारः | संविदाध्यापकः | 2015 तः अद्यावधि |
| 04 | डॉ. विनोदकुमारशर्मा | संविदाध्यापकः | 2016 तः अद्यावधि |
| 05 | डॉ. सचिनकुमारः | अतिथ्यध्यापकः | 2018 तः अद्यावधि |
| 06 | डॉ. मनिषकुमारचाण्डकः | संविदाध्यापकः | 2018 तः अद्यावधि |
| 07 | डॉ. जितेन्द्रकुमाररायगुरुः | संविदाध्यापकः | 2018 तः अद्यावधि |

**छात्रोपलब्धयः -**

| क्रम.सं. | शैक्षिकसत्रम् | नामाङ्कित-छात्राः | उत्तीर्णछात्रप्रातिशत्यम् | प्रथमश्रेण्योत्तीर्णच्छात्राः |
|---|---|---|---|---|
| 01 | 2011-12 | 49 | 100 | 49 |
| 02 | 2012-13 | 57 | 100 | 57 |
| 03 | 2013-14 | 63 | 100 | 62 |
| 04 | 2014-15 | 93 | 97 | 67 |
| 05 | 2015-17 | 48 | 100 | 48 |
| 06 | 2016-18 | 45 | 100 | 45 |
| 07 | 2017-19 | 48 | द्वितीयवर्षे अधीयानाः वर्तन्ते। | |
| 08 | 2018-19 | 49 | प्रथमवर्षे अधीयानाः वर्तन्ते। | |

महतः प्रमोदस्य विषयोऽयं यत् परिसरे ये छात्राः शिक्षाशास्त्रिकक्ष्यामुत्तीर्य गतास्ते सर्वेऽपि प्रायः उत्तमक्षेत्रेषु उत्तमोद्योगं प्राप्नवन्त इति। तत्र केचन केन्द्रसर्वकारीयाभिकरणेषु, केचन केन्द्रीयविद्यालयेषु, डी. ए. वी. संस्थासु, विभिन्नराज्यस्तरीयविद्यालयेषु, दिल्ली-स्वायत्त-विद्यालयेषु, सामान्यविद्यालयेषु च कार्यं कुर्वन्तो वर्तन्ते। तथैव केचन छात्राः विश्वविद्यालयस्तरेऽपि उपाधिधारिणः वर्तन्ते इति कथने मोमुद्यामहे वयम्।

**2018-19 शिक्षाशास्त्रविभागीयगतिविधयः -**

शैक्षिकसत्रेऽस्मिन् द्वितियवर्षेऽधीयानाः 48, प्रथमवर्षे प्रविष्टाः 49 छात्राध्यापकाः वर्तन्ते। ते च महाराष्ट्र - राजस्थान – गुजरात – मध्यप्रदेश – उत्तरप्रदेश – उत्तराखण्ड – पश्चिमबङ्गाल – ओडिशा - बिहारप्रान्तेभ्यः समागताः। एतेषां सत्रारम्भः 19-06-2018 दिनाङ्कतः समभूत्। विभागेऽस्मिन् छात्राणां बौद्धिक – मानसिक – सांस्कृतिक – मनोवैज्ञानिकविकासाय बहवः कार्यक्रमाः शैक्षिकगतिविधयश्च समायोजिताः। ते यथा -

1. अन्ताराष्ट्रिययोगदिवसः 21-06-2018
2. गुरुपूर्णिमाकार्यक्रमः सत्रारम्भश्च 10-07-2018
3. द्वितीयवर्षस्य कक्ष्यारम्भः 27-06-2018
4. प्रथमवर्षस्य कक्ष्यारम्भः 11-07-2018
5. सम्भाषणशिबिरम् 01-08-2018 तः 14-08-2018 पर्यन्तम्
6. २१ दिनात्मकभाषाबोधनवर्गः 01-08-2018 तः 24-08-2018 पर्यन्तम्

| | | |
|---|---|---|
| 7. | वाग्वर्धिनीसभायाः उद्घाटनम् | 24-08-2018 (प्रतिशुक्रवासरं मध्याह्ने सभा) |
| 8. | संस्कृतसप्ताहः | 27-08-2018 तः 29-08-2018 पर्यन्तम् |
| 9. | शिक्षकदिवसः | 05-09-2018 |
| 10. | हिन्दी पखवाडा | 14-09-2018 तः 25-09-2018 पर्यन्तम् |
| 11. | शिक्षणाभ्यासः | 21-09-2018 तः 11-12-2018 पर्यन्तम् |
| 12. | विद्यालयावबोधः | 05-11-2018 तः 11-12-2018 पर्यन्तम् |
| 13. | राष्ट्रियसङ्गोष्ठीविशिष्टव्याख्यानञ्च | 10-01-2019 तः 11-01-2019 |
| 14. | प्रायोगिकशिक्षणपरीक्षा | 28 जनवरी 2019 तः 30 जनवरी 2019 पर्यन्तम् |
| 15. | मनोविज्ञानपरीक्षा | 31 जनवरी 2019 तः 01 फरवरी 2019 पर्यन्तम् |
| 16. | सूक्ष्मशिक्षणप्रशिक्षणम् | 11-02-2019 तः 18-02-2019 पर्यन्तम् |
| 17. | क्रीडोत्सवः क्रीडास्पर्धाश्च | 13-02-2019 तः 14-02-2019 पर्यन्तम् |
| 18. | योगाभ्यासकक्ष्या | 15-02-2019 |
| 19. | आदर्शसाक्षात्कारः | 25-02-2019 |
| 20. | शोभायात्रा | 15-03-2019 |
| 21. | वीथीनाटकम् | 15-03-2019 |
| 22. | पूर्ववार्षिकपरीक्षाः | 18-03-2019 तः 22-03-2019 |
| 23. | वार्षिकपरीक्षाः | 04-04-2019 तः 22-04-2019 |

**अध्ययनार्थं सौविध्यानि —**

परिसरेऽस्मिन् छात्राणाम् अध्ययनार्थं प्राविधिकयन्त्रसहितकक्षाप्रकोष्ठः विद्यते । प्रकोष्ठेऽस्मिन् सङ्गणकध्वनिमुद्रिकाप्रक्षेपकयन्त्रैः दैनन्दिनपाठनं भवति । प्राध्यापकाः सङ्गणकयन्त्रस्य सहायेन बोधनं कथं करणीयमिति सप्रयोगं कक्ष्यायां प्रदर्शयन्ति । छात्राध्यापका अपि सङ्गणकस्य सदुपयोगं कुर्वन्तः प्राविधिकशिक्षणं प्राप्नुवन्ति ।

१. छात्रवृत्तिः- शिक्षाशास्त्रिकक्षायां ३० छात्राः स्वशैक्षिकयोग्यतानुगुणं प्रतिमासं अष्टशतं (८००/-) रुप्यकाणां छात्रवृत्तिं प्राप्नुवन्ति ।

२. सङ्गणकप्रयोगशाला - छात्राणां प्राविधिकसङ्गणकीयकौशलान्यभिवर्धयितुं सङ्गणकप्रयोगशाला स्थापिता । यत्र विंशत्यधिकसङ्गणकानि उपलब्धानि ।

३. मनोविज्ञानप्रयोगशाला - पाठ्यक्रमानुगुणं मनोविज्ञानप्रयोगान् कर्तुं यथासंख्यं पर्याप्तोपकरणानि विद्यन्ते ।

तथा पाठ्यक्रमेतरोपकरणान्यपि उपलब्धानि वर्तन्ते। तेषु अवधान – व्यक्तित्व – बुद्धि – अभिरुचि – अभिवृत्ति - चिन्तनविषयकाध्ययनार्थं मनोवैज्ञानिकोपकरणानि सन्ति।

४. विभागीयग्रन्थालयः - परिसरीयबृहत्केन्द्रग्रन्थालयमतिरिच्य विभागीयग्रन्थालये पाठ्यक्रमविषयान् अध्येतुं पुस्तकानि यथेष्टं स्वीकर्तुम् अवसरः छात्रेभ्यः प्रदीयते। तथैव ग्रन्थालयेऽस्मिन् १५०० पुस्तकानि पाठ्यक्रमसम्बद्धानि पाठ्यक्रमेतराणि अनुसन्धानविषयनिष्ठानि संस्कृतभाषादक्षतोत्पादकानि उच्चतरशिक्षां प्राप्तुमिच्छुकानां कृतेऽपि पुस्तकानि उपलभ्यन्ते।

५. प्रविधिप्रयोगशाला - छात्राणां प्राविधिकज्ञानार्थम्, उपकरणनिर्माणार्थम्, सङ्गणकमाध्यमेन पाठनाभ्यासं कर्तुं पर्याप्तोपकरणानि प्रविधिप्रयोगशालायां विद्यन्ते।

६. क्रीडाविभागः - छात्राणां सर्वाङ्गीणविकासार्थं क्रीडयितुं च डॉ. शङ्कर बाबुराव आन्धले इति क्रीडाप्रशिक्षकः वर्तते। यस्य मार्गदर्शने सोमैयापरिसरीयप्राङ्गणेषु शारीरिक - बौद्धिकक्रीडाः क्रीडितुम् अवसराः कल्प्यन्ते।

**विभागे शोधावसराः —**

विद्यावारिधिः (Ph.D.) इत्युपाधिं प्राप्तुं सुयोग्याः मार्गदर्शकाः विभागे विद्यन्ते। शोधविभागेऽस्मिन् शिक्षाशास्त्रसम्बद्धाः छात्राः, आधुनिकसंस्कृतविज्ञानशोधचिकीर्षवश्च विभिन्नक्षेत्रेषु शोधं विधातुं प्राप्तावसराः दृश्यन्ते। अधुना विभागस्यास्य वरिष्ठप्राध्यापकस्य डॉ. देवदत्तसरोदेवर्यस्य मार्गदर्शने श्रीमती मैत्रेयी मणेर इति शोधच्छात्रा व्याकरणविषये, डॉ. वि. एस्. वि. भास्कररेड्डिवर्यस्य मार्गदर्शने श्री योगेन्द्रकुमारः, श्रीमती नम्रता पटेल इति द्वौ शोधच्छात्रौ साहित्यविषये च शोधकार्यं कुर्वन्तः सन्ति।

इत्थं सर्वविधैः साधनैः नदीष्णप्राध्यापकैश्च साकं परिसरीयशिक्षाशास्त्रविभागोऽयं सर्वेषां छात्राध्यापकानां शोधोत्सुकानां प्रोत्साहनं वितन्वन्, छात्राणाञ्च शिक्षणकौशलानि अभिवर्धयन् वरीवर्ति।

**********

# विषयानुक्रमणिका


| क्र.सं | शोधपत्रस्य शीर्षकम् | लेखकः | पृष्ठसंख्या |
|---|---|---|---|
| 1. | शिक्षणाधिगमयोः मनोवैज्ञानिकप्राविधिकतत्त्वानामनुप्रयोगः | श्री. पी. नागमुनिरेड्डी | 1 |
| 2. | संस्कृतशास्त्रेषु विद्यमानाधिगमतत्त्वस्य तदुपकारकोपायानाञ्च विचारः | डॉ. देवदत्तसरोदे | 6 |
| 3. | अन्तर्जालाश्रित-शिक्षणाधिगमप्रक्रिया | डॉ. हरिप्रसादः के. | 17 |
| 4. | शिक्षणाधिगमयोः मनोवैज्ञानिक-प्राविधिकतत्त्वानामनुप्रयोगः | डॉ. वेङ्कटरमणभट्टः | 22 |
| 5. | शिक्षणाधिगमयोः प्राविधिकतत्त्वानां प्रयोगे गुणदोषविमर्शः | डॉ. कुमारः | 25 |
| 6. | व्यक्तित्वम् | डॉ. विनोदकुमारशर्मा | 30 |
| 7. | संस्कृतभाषाधिगमे मोबाइलसहकृतभाषाधिगमस्य अनुप्रयोगः | डॉ. सचिनकुमार | 35 |
| 8. | भाषायाः उद्गमे विविधसिद्धान्ताः | डॉ. बिचित्ररञ्जनपण्डा | 41 |
| 9. | भर्तृहरिकृते वाक्यपदीये भाषावैज्ञानिकतत्त्वानि | डॉ. मनीषजुगरान | 47 |
| 10. | शिक्षणाधिगमयोः मनोवैज्ञानिकप्राविधिक-तत्त्वानामनुप्रयोगे शिक्षकः | डॉ. डम्बरुधरपतिः | 57 |
| 11. | शिक्षणाधिगमप्रक्रियायाम् अधिगमसिद्धान्तानां विनियोगः | डॉ. रुद्रनारायणनरसिंहमिश्रः | 62 |
| 12. | शिक्षणाधिगमयोः शास्त्रेषु उपनिषत्सु च वर्णिताः मनोवैज्ञानिकाभिगमाः | डॉ. गणपति वि. हेगडे | 66 |
| 13. | भारते अध्यापकशिक्षा | डॉ. महेशकुमारपाणिग्राही | 73 |
| 14. | साम्प्रतिकशिक्षाक्रमे मूल्यसम्वर्धने गैर्वाण्याः उपादेयता | डॉ. प्रभलविद्याधरः | 83 |
| 15. | शिक्षणकर्मणि अन्तर्जालस्य विनियोगः | Dr. S.T.P Kanakvali | 88 |
| 16. | शिबिरविधिः | एस्.वैष्णवी | 95 |
| 17. | शारीरिक शिक्षा में आईसीटी | Dr. Shankar B. Andhale | 101 |
| 18. | Implematation of Inclusive Education in India : Issues and Challenges | Dr.V.S.V. Bhaskar Reddy | 106 |

19. Application of MOOCs & SWAYAM in Teaching Learning Process — Dr. J. K. Rayaguru — 113
20. Use of Internet in Teaching Learning Process — Dr. Manish K. Chandak — 119
21. Role of SWAYAM in Online Teaching-Learning Process — Dr. Prem Singh Sikarwar — 126
22. Virtual Classroom: An Interactive Model for E-learning — Dr. Shweta Sood — 132
23. Innovative Perspective of Applying Technology in Sanskrit Education — Dr. Namrata Patel — 137

## प्रज्ञानखण्डः

24. शास्त्रशिक्षणविधयः शास्त्रसंरक्षणोपायाश्च — गान्धिवर्गः — 144
25. विविधमनोवैज्ञानिकानां मतानुसारं व्यक्तित्वस्य सिद्धान्ताः — भामहवर्गः — 155
26. भारतीयपाश्चात्यदर्शनयोः संवर्णितानां शैक्षिकतत्त्वानां समालोचनम् — दण्डिवर्गः — 165
27. आधुनिकभारते संस्कृतशिक्षणस्य आवश्यकता उपहुतयश्च — कुन्तकवर्गः — 176
28. शिक्षणे अधिगममूल्याकलनयोः महत्त्वम् — सावरकरवर्गः — 182
29. केन्द्रीय हिंदी निदेशालय का हिंदी के विकास में योगदान — जगन्नाथवर्गः — 187

**********

# शिक्षणाधिगमयोः मनोवैज्ञानिकप्राविधिकतत्त्वानामनुप्रयोगः

✍श्री. पी. नागमुनिरेड्डी *

**द्वे विद्ये वेदितव्ये परा चापरा च ।**
**मोक्षे धीर्ज्ञानं अन्यत्र विज्ञानं शिल्पशास्त्रयोः ।**
**तत्कर्म यन्न बन्धाय सा विद्या या विमुक्तये ।**
**आयासायापरं कर्म विद्यान्या शिल्पनैपुणम्॥**

इत्यत्र शिल्पनैपुण्यादि व्यावहारिकविद्या, वर्तमानकाले या Science Education , Technical Education, Vocational Education, Professional Education इत्यादि नाम्ना प्रसिद्धा सा प्राचीनभारते **"अपरा विद्या"** इति नाम्ना व्यवहृता आसीत् ।

**अथ परा यया तदक्षरमधिगम्यते ।**
**अविद्यया मृत्युं तीर्त्वा विद्ययामृतमऽश्नुते ।**
**अध्यात्मविद्या विद्यानां......।**

इत्यत्र मोक्षदायिनी संसारनिवर्त्तनी, निवृत्तिपरा विद्या **"पराविद्या"** इति नाम्ना पूर्वं प्रथिता आसीत् । पराविद्या इत्युक्ते श्रेष्ठविद्येति, अपरा विद्या इत्युक्ते निकृष्टेति नार्थः । परेतरविद्या अपरा विद्या इत्यर्थः । पराविद्यायाः लक्ष्यमन्यत् । अपरा विद्यायाः लक्ष्यमन्यत् ।

**अपरा विद्या संसारे प्रवर्तयति ।**
**परा विद्या संसारात् निवर्तयति ।**

यो यदिच्छति तस्य तदितिवत्" यस्य यत्र मतिर्भवति अधिकारः भवति तेन तादृशी विद्या अर्जनीया इत्यर्थः । पुरुषार्थाः चत्वारः । धर्मार्थकाममोक्षाः इति । धर्मार्थकामपर्यन्तं अपरा विद्या आश्रीयते । मोक्षार्थं तु परा विद्यैवाश्रयणीया भवति । आत्मशान्त्यर्थं जन्मराहित्यार्थं तु परा विद्यैव शरण्या भवति । अत एवोक्तम् - धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः इति । यतोऽभ्युदयनिश्श्रेयससिद्धिस्स धर्म इति जीवनविधानत्वेन भारते घोषितमस्ति । अतः उभयोरपि **पराविद्यायाः अपराविद्यायाश्च** सङ्गतिः वरीवर्ति एव । प्रस्तुतशीर्षकं "शिक्षणाधिगमयोः मनोवैज्ञानिकप्राविधिकतत्त्वानामनुप्रयोगः" इत्येतदपराविद्यायामन्तर्भवति । शिक्षणस्योपरि अधिगमस्योपरि च मनौवैज्ञानिकतत्त्वानां प्राविधिकतत्त्वानां चानुप्रयोगः कथं भवतीति कतिपयैः अनुसंधानात्मकैरंशैः सूच्यते।

- **Heuristic Method : – स्वयमन्वेषणविधिः –**

आधुनिकवैज्ञानिकपद्धतित्वेन इयं पद्धतिः कीर्त्यमाना वर्त्तते । परमस्याः मूलं **वारुणीविद्यायां** द्रष्टुं शक्यते । तैत्तिरीयोपनिषदि शिक्षावल्याम् अन्न – प्राण – मनो – विज्ञान – आनन्दमय ब्रह्मान्वेषणे लभ्यते । भृगुर्वै वारुणिः वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तस्मै एतत्प्रोवाच –

* *वरिष्ठाध्यापकः , शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः*

यतो वा इमानि भूतानि जायन्ते
येन जातानि जीवन्ति ।
यत्प्रयन्त्यभिसंविशन्ति
**तद्विजिज्ञासस्व तद्ब्रह्मेति । तपसा ब्रह्म विजिज्ञासस्व तपो ब्रह्मेति ।**

स तपो अतप्यत । तपस्तप्त्वा अन्नं ब्रह्मेति व्यजनात् । पिता वरुणः तपसा ब्रह्म विजिज्ञासस्व तपो ब्रह्मेति अवोचत् । ततः तपसा प्राणं ब्रह्मेति, अनन्तरं मनो ब्रह्मेति, ततः विज्ञानं ब्रह्मेति, ततः आनन्दं ब्रह्मेति व्यजानात् । एवं **स्वयमन्वेषणविधिद्वारा** ब्रह्मज्ञातुं पिता प्रेरितवान् ।

- **Experimental Method: – प्रयोगविधिः -**

इयमप्यत्यन्ताधुनिकपद्धतित्वेन वैज्ञानिकपद्धतित्वेन वा कीर्त्यमाना विद्यते । अस्याः अपि मूलं छान्दोग्योपनिषदि गुरुशिष्यसंवादे द्रष्टुं शक्यते । आचार्यशिष्यसंवादे आचार्यः शिष्यमादिशति - न्यग्रोधफलमाहरेति । इदं भगव इति । भिन्धीति । भिन्नं भगव इति । आसामङ्गैकां भिन्धीति । भिन्ना भगव इति । किं पश्यसीति । न किञ्चन भगव इति । यं वै सौम्य ! एतमणिमानं न विभावयसि । एतस्य वै सौम्य ! एष अणिम्नः एष महान्यग्रोधस्तिष्ठति । श्रद्धस्व सौम्येति" । अनेन ज्ञायते यत् अतिगहनः सुसूक्ष्मः विषयोऽपि प्रयोगपुरस्सरं आचार्यैः बोध्यते स्म इति ।

- **मनोविश्लेषणवादे Id, Super Ego : –**

फ्रायड् महाशयस्य मनोविश्लेषणवादः अत्यन्तं सुप्रसिद्धः अपूर्वश्चेति परिगण्यमानो वर्तते । परं श्रीमद्भगवद्गीतायां Id स्वरूपस्य, Super Ego स्वरूपस्य मूलं द्रष्टुं शक्नुमः । **Id मतेः** स्वरूपं फ्रायड् महोदयानुसारं एवमस्ति - इयं सहजाता (It is an instinct) । सुखमात्रपरा च । सर्वदा सुखमेव केवलमनुभवितुं बलादपि प्रेरयति । सुखानुभवविषये सामाजिकसांस्कृतिकनैतिकतादिविषये नैव श्रद्धां प्रदर्शयति । एतत्कतिपयनियमानुल्लंघ्यापि सुखं लभस्वेति प्रेरयति । सर्वदा स्वार्थमेव ईहते । **Super Ego मतेः** स्वरूपं एवमस्ति - इयं नैतिकवर्तनी । धर्माधर्मविवेकपूर्णा । असुखकरोऽपि धर्म एव सदाचरणीय इति सर्वदा प्रेरयति । श्रीमद्भगवद्गीतायां उपर्युक्तमेव तत्त्वं दैवासुरसंपद्विभागयोगे Id आसुरीसंपत्तित्वेन, Super Ego दैवीसंपत्तित्वेन च अतिविस्तरेण वर्णिते उपलभ्येते । तद्यथा-

- **दैवीसंपत्तिः(Super Ego) -**

**अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।**
**दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ।**
**अहिंसा सत्यमक्रोधस्त्यागशशान्तिरपैशुनम् ।**
**दया भूतेष्वलोलुपत्वं मार्दवं ह्रीरचापलम् ।।**
**तेजः क्षमा धृतिश्शौचमद्रोहो नातिमानिता ।**
**भवन्ति संपदं दैवीमभिजातस्य भारत ! ।।**

- **आसुरीसंपत्तिः ( Id ) -**

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम् ॥
दैवीसंपद्विमोक्षाय निबन्धायासुरी मता ।
माशुचस्संपदं दैवीमभिजातोऽसि पाण्डव ॥
द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च ।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ ! मे शृणु ॥
प्रवृत्तिं च निवृत्तिञ्च जना न विदुरासुराः ।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥
असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसंभूतं किमन्यत्कामहैतुकम् ॥
एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥
काममाश्रित्यदुष्पूरं दम्भमानमदान्विताः ।
मोहादृहीत्वासद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः ॥
चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ॥
आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥
इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥
असौ मया हतश्शत्रुर्हनिष्ये चापरानपि ।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ॥
आढ्योऽभिजनवानस्मि कोऽन्योस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥
अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥
आत्मसंभावितास्स्तब्धा धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥
अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥

**तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ।**
**क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥**
**आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।**
**मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥**
**त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।**
**कामः क्रोधस्तथालोभस्तस्मादेतत्त्रयं त्यजेत् ॥**
**एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ।**
**आचरत्यात्मनश्श्रेयस्ततो याति परां गतिम् ॥**

एतेन स्पष्टं भवति यत् Id मतेः, Super Ego मतेः मूलं श्रीमद्भगवद्गीतायां अस्तीति ।

- **Einstein's definition of ENERGY**

"Energy is neither created nor can be destroyed. It is constant. It can be Transformed"

एतस्य मूलं श्रीमद्भगवद्गीतायां स्पष्टतयास्ति । तद्यथा –

**न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः ।**
**अजो नित्यश्शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥**
**वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।**
**तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥**

Einstein महोदयस्य Energy शक्तिर्भवति । एषा परा शक्तिरूपेण, आदिशक्तिरूपेण, मूलशक्तिरूपेण, परात्पररूपेण, परतत्त्वरूपेण, परब्रह्मरुपेण, परात्मा इति, आत्मा इत्यादि बहुविधैः शब्दैः शास्त्रेषु दर्शनेषु च सूचिता वर्तते । एतेन स्पष्टं भवति यत् अस्याः अपि मूलं भारतीयतात्त्विकालोचनायां वरीवर्तते इति ।

- **ZENE Theory**

अस्यापि आनुवंशिकसिद्धान्तस्य मूलं परमेश्वरस्य **अर्धनारीश्वरतत्त्वे** द्रष्टुं शक्यते । विज्ञानानुसारं XY chromosomes जनकद्रव्याणि पुरुषे एव भवन्ति न तु स्त्रियाम् । स्त्रियां तु XX जनकद्रव्याण्येव भवन्ति । तत्र Y जनकद्रव्यमेव पुंस्त्वसंततिसूचकं भवति । X जनकद्रव्याणि स्त्रीसंततिसूचकानि भवन्ति । पुरुषे वर्तमान XY मध्ये X जनकद्रव्याणाम् एव संयोगः योषिति वर्तमान XX जनकद्रव्यैः साकं भवति चेत् स्त्रीसंततिर्भवतीति, पुरुषे एव वर्तमान Y जनकद्रव्यैस्सह संयोगः स्त्र्यन्तर्गत XX जनकद्रव्यैस्सह भवति चेत् पुरुषसंततिर्भवतीति विज्ञानेन निरूपितमस्ति । एतदेव प्रतीकरूपेण (Symbolically) **अर्धनारीश्वरतत्त्वे** सूचितमस्ति । अर्धनारीश्वरत्वे पुरुषत्वमप्यस्ति स्त्रीत्वमप्यस्ति । अर्थात् X जनकद्रव्याणि पुरुषत्वसूचकानि एवं Y जनकद्रव्याणि स्त्रीत्वसूचकानि सन्तीत्यर्थः । एतत् अर्धनारीश्वरत्वं परमशिवे (पुरुषे एव) एव अस्ति न

तु पार्वत्याम् । पार्वत्यां तु अर्थात् (स्त्रियां) XX इति स्त्रीत्वप्रजननसमर्थाणि जनकद्रव्याण्येव भवन्तीत्यर्थः । अत एव पार्वतीपरमेश्वरौ "जगत्पितरौ" इति कीर्तितौ –

**वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।**
**जगतः पितरौ वंदे पार्वतीपरमेश्वरौ ।।**

इति महाकविना कालिदासेन घोषितमस्ति । परमशिवः पार्वतीं प्रति एवं कथयति । अहं शुक्रस्त्वं शोणितम् । आवयोः सङ्गमः इमाः सर्वाः प्रजाः इति । एतेन स्पष्टं भवति यत् zene Theory इत्यस्य मूलं भारतीयतंत्रग्रन्थेषु लभ्यते इति ।

- **Brain Storming – मस्तिष्कविप्लवः -**

Brain Storming इत्युक्ते चर्चायां भागग्रहीतारः सर्वेऽपि यादृशीः भावनाः अभिव्यञ्जयन्ति तासां तिरस्कारो वा विमर्शो वा प्रथमाधिवेशने न भवति । तासामुपरि चर्चा खण्डनमण्डनादिकं विमर्शनं वा सद्यः न भवति । कालान्तरे अन्यस्मिन् अधिवेशने पूर्वाभिव्यक्तानां आलोचनानां मूल्याङ्कनादिकं भवति । एतादृशरीत्या आविष्कृतानां भावानां महन्मूल्यमस्तीति परिशोधनैः ज्ञातं वर्तते । समुद्रमन्थनद्वारा अमृतप्राप्त्युदन्तोऽपि एतादृशीं प्रक्रियामेव सूचयति । प्रतीकरूपेण (Symbolically) मन्थनद्वारा अमृतफलप्राप्तिरूपिणी क्रियोत्पत्तिः भवतीति सूचितास्ति । लोकेऽपि तक्रस्य मन्थनेनैव नवनीतं उत्पद्यते । योगशिखोपनिषद्यपि एतदेव तत्त्वं उक्तमस्ति । तद्यथा –

**यथाग्निर्दारुमध्यस्थो नोतिष्ठेन्मन्थनं विना ।**
**विनाचाभ्यासयोगेन ज्ञानदीपस्तथा न हि ।।** Yogashikha – 6-76

- **Bloom's Taxonomy of Educational Objectives - ब्लूम महोदयस्य शिक्षाद्देश्यानां वर्गीकरणम् -**

Cognitive Domain, Affective Domain, Conative Domain रुपेण प्राधान्येन ब्लूममहोदयस्य शिक्षोद्देश्यानां वर्गीकरणं प्रसिद्धमस्ति । अस्यापि मूलं भारतीयतात्त्विकचिन्तने दर्शनधारायां ज्ञानशक्तिः Cognitive Domain (इच्छाशक्तिः), Affective Domain (क्रियाशक्तिः), Conative Domain इत्यत्र द्रष्टुं शक्यते । एतेन स्पष्टं भवति यत् शैक्षिकविधानस्य मूलं प्राचीनभारते बहुत्र द्रष्टुं शक्यते इति ।

अनुप्रयोगे सूक्ष्मेक्षिकया परिशीलनं , उभयत्र गंभीरज्ञानं, वैज्ञानिकदृष्टिः, नूतनदृष्ट्या परिशीलनं, तुलनात्मकरीत्या प्रतिपादनञ्चेत्यादिकमपेक्षते । दुर्योधनादि कौरवसंततिः Test Tube Baby प्रक्रियासूचिका वर्तते । शिखण्डी Transgender इत्यस्य प्रतीकरूपः ।

**********

Last modified: 23 Sep 2021